ॐ

तुरीयाश्रमग्रहणप्रयोगः यतिधर्मसंस्कारश्च



धर्मो रक्षति रक्षितः

JACL-KRC
021233
B
542
/TU
1233

ग्रन्थकार : विद्वान् वासुदेव रामचंद्र परांजपे

भारती प्रबोध शोध संस्था
सोंदा, २००६

21233 Q1:22 N85 पुस्तकालय

ॐ

॥ श्रीमद् सोन्दा - स्वर्णवल्लीमहासंस्थानाधीश्वराः
श्रीमद् गङ्गाधरेन्द्र - सरस्वती - श्रीचरणाः ॥



350
13/3

SV-2024

श्रीमद्त्काञ्चनवेलिपीठविलसद्गङ्गाधरेन्द्रान् यतीन्
साष्टाङ्गं प्रणिपत्य पूज्यपदयोः ग्रन्थं निजं चार्पयन् ।
राधागर्भजवासुदेवनयवित् श्रीरामचन्द्रात्मजो
ह्यात्मानं कृतकृत्यमेव मनुते गुर्वाशिषः प्रार्थयन् ॥

अक्षरयोजना
श्री. अभिजित्-जयन्त-फडके
कु. स्वाती-विवेक-भट
पुण्यपत्तनम्

मुद्रणम्
संवाद-ट्रेड-प्रिंटस्, पुण्यपत्तनम्

प्रकाशकः
परशुराम-रामचन्द्र-पराञ्जपे
कार्यवाहः
भारती-प्रबोध-शोध-संस्था
पो. सोन्दा, शिरसी,
जि. उत्तरकन्नड, कर्नाटक
पिन - ५८१३३६

प्रथमावृत्तिः (५०० प्रतयः)
मूल्यम् - ५०/- (पञ्चाशद्रूप्यकाणि)
© स्वामित्वम् - प्रकाशकाधीनम्

JACL-KRC
021233

प्राप्तिस्थानम्

श्री. परशुराम-रामचन्द्र-पराञ्जपे
फ्लॅट नं.-८, भाग्यश्री अपार्टमेंट,
सर्वे नं. २५।६।१।१. हिंगणे खुर्द,
सिंहगड रोड. पुणे - ४११००५१
दूरध्वनी :- (०२०) २४३४७३८९

श्री. वासुदेव -रामचन्द्र- पराञ्जपे
गृहसं. ७४५, वैभव ४ मार्ग, २४ उपमार्गः
विद्यारण्यपुरम्, मैसुरु - ५७०००८
दूरभाषा - ०८२१२४८३१५४
मोबाईल नं. - ९४४८६०१०५६

अन्तरङ्गम्

क्रं.	शीर्षकम्	पत्रम्
१.	आमुखम् - श्री श्री ब्रह्मीभूताः सर्वज्ञेन्द्रसरस्वतीस्वामिनः श्री सोन्दा-स्वर्णवल्ली-पीठाधिपतयः	
२.	ग्रन्थार्पणम् - श्री श्री गङ्गाधरेन्द्रसरस्वतीयतिवर्याः श्री सोंन्दा-स्वर्णवल्लीपीठाधि-पतयः	
३.	प्रास्ताविकम् - श्रीमन्तः त्रि. ना. धर्माधिकारिणः	I - III
४.	ग्रन्थकर्तुराशयः - विद्वान् वासुदेव रा. पराञ्जपे	IV-V
५.	प्रकाशकवचनम् - श्री. परशुराम-पराञ्जपे	VI - VII
६.	संन्यासे अधिकारी	१
७.	कुटीचकादि सन्यासलक्षणम्	३
८.	संन्यासग्रहणप्रयोगः	४-३८

i) कालनिर्णयः - ४ ii) कूष्माण्डहोमः - ४ iii) कूष्माण्डविधायकआरण्यकम् - १०
iv) साग्निकस्य/निरग्निकस्य अष्टौ श्राद्धानि - ११ v) सवित्रप्रवेशः - १७
vi) आहितागेर्विशेषः - १९ vii) सारस्वतहोमौ - १९ viii) विरजाहोमः - २२
ix) सर्वत्यागविधिः - २७ x) प्रैशौच्चारणम् - २८ xi) वाक्योपदेशः - २८
xii) पर्यङ्कशौचविधिः - २९ xiii) योगपट्टः - ३० xiv) आतुरस्य संन्यासविधिः - ३०
xv) यतिधर्माः - ३१ xvi) मृतयतिसंस्कारः - ३३
xvii) पार्वणश्राद्धम् - ३५ xvii) नारायणबलिः - ३६ xix) आराधनम् - ३७

॥ श्रीः ॥

प्रास्ताविकम्

ॐ नमो ब्रह्मणे नमो अस्त्वग्नये नमः पृथिव्यै नम ओषधीभ्यः ।
नमो वाचे नमो वाचस्पतये नमो विष्णवे बृहते करोमि ॥

(तै.आ.२.१२)

" न कर्मणामनारम्भात् नैष्कर्म्यं पुरुषोऽश्नुते ।
न च संन्यतनादेव सिद्धिं समधिगच्छति "।

(भगी ३.४)

इति भगवता वासुदेवेनैव समुपदिष्टम् । तत्र कमर्णामारम्भादपि पुरुषः नैष्कर्म्यमश्नुते । कर्मणाम् असंन्यासदपि पुरुषः सिद्धि समधिगच्छति इत्यर्थः प्रर्यवस्यति ।

तत्र प्रपञ्च्यते - वेदस्तावत् कर्मकाण्डज्ञानकाण्डाभ्यां द्विधा भिद्यते । पूर्वस्मिन् काण्डे नित्यनैमित्तिक कमर्णामनुष्ठानात् तदकरणे प्रत्यवायरूपमनिष्टं परिहियतेष यावज्जीववाक्येषु अनुवक्तोऽपि अवर्जनीयतया स्वाभीष्टः स्वर्गः प्राप्यते । काम्यानामनुष्ठाने इष्टप्राप्तिहेतुत्वं तत्तद्विधिवाक्येषु समाम्नातं दृश्यते । निणिद्धवर्जनेन रागप्राप्तनिषिद्धानुष्ठानजन्यः नरकपातः परिहियते । अत आहुः पूज्यपादाः श्रीमच्छंकराचार्याः ' सर्वोऽप्ययं वेदः प्रत्यक्षानुमानाभ्यामनवगतेष्ट-प्राप्त्यनिष्ट परिहारोपायप्रकाशन पराः ' (बृहदारण्यकोपनिषद्भाष्य भूमिका), सायणार्याश्च इष्टप्राप्त्यनिष्टपरिहारयोः ' अलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः ' (तैसं भाष्यभूमिका) इति ।

एवं सत्यपि न कर्मणामारम्भात् अपुरनावृत्ति लक्षणस्य आत्य-न्तिकपुरुषार्थस्य सिद्धिः श्रूयते । प्रत्युत ज्ञानकर्मणोः पर्वतवदकम्प्यः विरोधोऽपि

पूर्वाचार्यैरवर्णि। तर्हि किमुच्यते कर्मणामारम्भात् नैष्कर्म्यंचाश्नुते इति। सोऽयं वदतो व्याघात एव केवलम्।

अत्रोच्यते - नित्यनैमित्तिकाभ्यां न केवलमानुषङ्गिकफलप्राप्तिः अपितु विविदिषोत्पादनद्वारा ब्रह्मज्ञानहेतुत्वमपि तयोरस्ति। तदुक्तं बृहदारण्यके - ' तमेतं वेदानुवचनेन ब्राह्मणाः विविदिषन्ति यज्ञेन --' (बृउ ४. ४. २२) इत्यादि। ज्ञानकर्मणोः पर्वतवदकम्प्यो विरोधश्च सह अनवस्थान लक्षणः। ज्ञानकर्मनिष्ठयोः परस्पर विरोधात् तयोः युगपदनुष्ठातु मशक्यत्वे इतरेतरानपेक्षयोः एव परमपुरुषार्थ हेतुत्वमास्विति चेत्। न कर्मनिष्ठायाः ज्ञाननिष्ठाप्राप्तिहेतुत्वेन परंपरया परमपुरुषार्थहेतुत्वं, न स्वातन्त्र्येण। अतः यज्ञादीनां कर्मणाम् इह जन्मनि जन्मान्तरे वा अनुष्ठितानाम् उपात्तदुरितक्षयहेतुत्वेन सत्वशुद्धिकारणाम्, तत्कारणत्वेन च ज्ञानोत्पत्तिद्वारा ज्ञाननिष्ठहेतुत्वमपि अस्तीत्यालोच्य 'कर्मणा-मारम्भात् नैष्कर्म्यमश्नुते' इत्युच्यते इति। एवं च नैष्कर्म्यलक्षणस्य ज्ञानयोगस्य उपायत्वेन कर्मयोगः प्रतिपाद्यते। ततः कर्मयोगोपायेन ज्ञानयोगरूपस्य उपेयस्य सिद्धौ कर्मणां स्वरूपतः त्यागः एव संन्यासः। नित्यनैमित्तिकानामकरणे प्रत्यवायस्तु साग्निकानां गृहमेधिनामेव, न संन्यासिनामिति दिक्।

एवं स्थिते मीमांसानयपारदृश्वभिः श्रौते कर्मणि निष्णातैः विष्णुवृद्धगोत्रजैः वासुदेवशास्त्रिभिः इतः पूर्वम् आश्रमत्रयाणां विवेचनं कन्नडभाषायां विधाय अधुना गीर्वाणवाणीमाध्यमेन ' तुरीयाश्रमग्रहणप्रयोगः - यतिधर्मसंस्कारश्च ' इत्याख्यम् अनतिदीर्घं निबन्धरत्नं विरच्य प्राकाश्यं नीयते इद्युदन्तः अन्तर्मनसि नः महान्तं प्रमोदार्णवं वितनोति।

निबन्धेऽस्मिन् संन्यासे अधिकारिणं, आतुरपञ्चमानां कुटीचका-दीनां चतुर्णां संन्यासिनां प्रभेदान्, एकदण्डत्रिदण्डभेदान्वितान् च निर्दिश्य संन्यासग्रहणप्रयोगं च ग्रन्थकृत् विवृणुते। प्रयोगे संन्यासग्रहणे प्रशस्तः कालः, संकल्पः, चतुःकृच्छ्रात्मकं प्रायश्चित्तं अष्टौश्राद्धानि आत्मश्राद्धसहितानि,

शिखावापनम्, सावित्रीप्रवेशः, गृह्याग्निसमिन्धनम्, अहिताग्नेरिष्टिः, कूष्माण्डहोमः, सारस्वतहोमौ तैत्तिरीयारण्योक्ताः विरजा होमाः, सर्वत्यागविधिः, जलाञ्जलिः, सर्वभूतेभ्योऽभयदानम्, शिखाकेशोत्पाटनं, यज्ञोपवीतोद्धरणं, तयोश्च जले होमः, कौपीनधारणं , दण्डस्वीकारः, वाक्योपदेशः, पर्यङ्क- शौचविधिः यतिधर्माः इत्येतान् विषयान् मन्त्रसहितान् सविस्तरं विविच्य ततः मृतयतिसंस्कारः पार्वणश्राद्धसहितः, आराधनविधिश्चेति विषया अपि सूक्ष्मेक्षिकया निर्दिष्टाः सन्ति ।

निबन्धरचनार्थं, धर्मसिन्धुः, याज्ञवल्क्यस्मृतिः, जाबालश्रुतिः, बौधायनसूत्रम् आपस्तम्बसूत्रं, मिताक्षरा मनुः, अत्रिः, कपिलः विष्णुस्मृतिः, स्मृत्यर्थसारः आङ्गिरः स्मृतिः वासिष्ठस्मृतिः, बृहत्छौनकः, व्यासस्मृतिः, छागलः इत्यादीन् नैकान् ग्रन्थार्णवान् आमूलचूडं निरलसं निर्मथ्य विष्णुवृद्धा वासुदेव शास्त्रिणः, सारभूतं नवनीतरत्नं ' तुरीयाश्रमग्रहणप्रयोगः - यतिधर्मसंस्कार ' रुपेण अस्मद्धस्ताभ्याशं कृत्वा प्राच्यविद्याप्रणयिनश्च अधमर्णीकृतवन्त इति तेभ्यो धन्यवादान् वितीर्य विरमामो वाचां विस्तरात् इति शम् ।

ज्येष्ठ शु ॥ १५ ॥
शके १९२८
भानुवासरः ।
दि. ११ जून २००६.

विदुषामनुचरः
त्रि. ना. धर्माधिकारी,
पुणे.

ॐ

ग्रन्थकर्तुराशयः ।

पूर्वं मया कर्नाटभाषायां "संस्कारसञ्जीविनी" इति ग्रन्थः लिखितः । तस्मिन् ब्रह्मचर्य-गृहस्थ-वानप्रस्थाश्रमाणां धर्माः, आचरणं, प्रयोजनम् आध्यात्मिकाधिभौतिकं च लिखितमस्ति । ग्रन्थोपसंहारे योग-संन्यासयोः प्रस्तावः कृतोऽस्ति यत् - मूर्धाविदलनेन प्राणोत्क्रमणे सति तुरीयः पुरुषार्थः सिध्यतीति । । अतः संन्यासग्रहणप्रयोगः, यतिधर्मः, यतिसंस्कारविधिः, एतेषां प्रयोगाणां लेखनमन्तरा चतुराश्रमधर्मलेखनकार्यमपरिपूर्णं भवति इति धिया लिखितोऽयं ग्रन्थः । तथा हि - नैके मां पृष्टाः सन्ति - अग्निहोत्रिणः संन्यासग्रहणं कथं भवेत् ? धर्मसिन्धौ तत्प्रयोगो विद्यते किन्तु समन्त्रकः कृत्स्नप्रयोगो नास्ति । तत्र प्रदर्शितानां कूष्माण्डहोम-विरजाहोम-प्राजापत्येष्टीनां मन्त्रप्रतीकाणामाकरः कः ? एतैः प्रश्नैरुद्बोधितः सन् लेखनमिदमकार्षम् ।

ग्रन्थेऽस्मिन् त्रैवर्णिकानां सामान्यप्रयोगो विलिखितोऽस्ति । तथा च आश्रमसमुच्चयपक्षं, आश्रमविकल्पपक्षं चादृत्य ब्रह्मचर्यतः, गृहस्थतः, वानप्रस्थतो वा साक्षात् संन्यासाश्रमप्रवेशोल्लिखितः । संन्यासेषु बहूदक-कुटीचक-हंस-परमहंसभेदाः, तत्राधिकारिणः, तेषां धर्माश्च प्रतिपादिताः । आतुरस्य, विधुरस्य, साग्निकस्य, निरग्निकस्य, अग्निहोत्रिणः च संन्यासाश्रमग्रहणविधि-विधानं समन्त्रकं कृत्स्नं प्रयोगे वर्णितम् । यतिदेहसंस्कारविधिराराधनविधानं च संयोजितमस्ति ।

ग्रन्थस्यास्य प्रकाशने नैके सहकृताः सन्ति - कु. स्वाती भट, श्री. अभिजित् फडके-इत्येतौ वर्णसंयोजकौ, संयोजनावसरे सम्भूतानां दोषाणां दोषमार्जकौः सौ श्रद्धा पराञ्जपे, श्री. परशुराम-पराञ्जपे इत्येतौ, मुद्रकाः श्री शैलेन्द्र बोरकर महाभागाः, प्रकाशकाः भारती-प्रबोध-शोध-संस्थायाः कार्यकर्तारः, तेषां सहायकाश्चेति । ते सर्वेऽत्र सकार्तज्ञं स्मरणीया एव खलु ?

मृणालमन्तरा पद्मं न विराजते, न वर्धते च। ग्रन्थसुममिदं सुशोभितमस्ति प्रास्ताविकमृणालेन। सुवचसा सौहार्देन च प्रास्ताविकं विलिख्य ग्रन्थकुसुमं प्रवर्धितमस्ति माननीयैः विद्वद्भिः श्रीमद्भिः त्रिविक्रम-नारायण-धर्माधिकारिभिः। तेऽत्रोत्तमर्णत्वेनाभिवन्द्याः सन्ति।

ग्रन्थस्यास्य प्रकाशनसंस्थास्ति 'भारती-प्रबोध-शोध-संस्था'। संस्थायाः सर्वप्रथमं सुमनसमिदं संन्यासाश्रमग्रहणविधानम्। इदमेव खलु परमपुरुषार्थस्य प्रथमं सोपानम्। 'संन्यासयोगाद्यतयः शुद्धसत्वाः। ते ब्रह्मलोके.....' इत्यादि श्रुतेः। संस्थायाः कार्यनिर्वाहकोऽस्ति ममानुजः परशुराम-पराञ्जपेवर्यः युवा प्रकाशकः। साशिषा अनुगृह्यते सः वारं वारम् एतादृशधर्मशोधक-ग्रन्थाः प्रकाशिता भवेयुः स्वकीयायाः संस्थायाः इति।

ज्येष्ठ शु॥ १५॥
शके १९२८
भानुवासरः।
दि. ११ जून २००६.

विद्वज्जनवशंवदः
पराञ्जपे इत्युपाह्वो वासुदेवशर्मा

॥ श्रीः ॥

प्रकाशकीयम्

वेदितव्याश्चायमुदन्तः विपश्चिदग्रिमैः सुधापुरेत्यैतिह्यनाम्नि साम्प्रतिके सोन्दापुरे भारतीप्रबोधशोधसंस्थाभिधानेन संशोधनकेन्द्रमेकं जनिमलभदिति। आवेदात् प्राचीनानां वाङ्मयानां संशोधनेन सम्यगध्ययनपूर्वकं नवनीतं किञ्चिन्निर्मन्थ्य जिज्ञासुनां पुर उपस्थापनमस्य संधोधनमन्दिरस्य प्रधान उद्देशः। अतः भारती प्रबोधशोधसंस्थेयं तस्योद्देशस्य परिपूर्त्यर्थं नितरां कटिबद्धा अनवरतं यतमाना च विराजते।

संस्कृतप्रचारप्रचुरेऽस्मिन् भूभागे गैर्वाणवाङ्मयस्य समृद्धग्रन्थालयस्याभाव इत्यहो दैवदुर्विलसितम्। अतः अमुमभावमंशतोऽपि किं न स्यादपाकर्तुमिति धियाऽष्टादशवर्षेभ्यः प्राक् नाम्ना 'भारतीप्रबोध - संस्कृतग्रन्थालयः' इत्यैकः पुस्तकभाण्डागारः निर्मितः। यश्चानति कालादेव प्राक् भारतीप्रबोधशोधसंस्थात्वेन परिवर्तितः। जनसामान्येषु संस्कृतभाषाविषयिणी या भीतिर्वर्तते, 'भाषेयं न सामान्यैरधिगन्तुं शक्या तादृशी क्लिष्टरूपा' इति तामपाकर्तुं, संस्कृतवाङ्मयार्णवे विद्यमानानि रत्नानि जिज्ञासूनां हस्तसात् कर्तुञ्चेयं संस्था यतमाना वर्तते। अतः ताडपत्रभूर्जपत्रात्मकादीनां पाण्डुलिपिग्रन्थानां मुद्रितानां च ग्रन्थानां संहारः पिपठिषूणामुपकाराय कल्पनीयः इत्यादयोंऽशाः आनुषङ्गिकोद्देश्यत्वं भजन्ते।

संप्रति संस्थाया अस्याः प्रथमं पुष्पं प्रकटयदस्तीत्यहो मन्देतरमानन्द-मनुभवामः। तदेतत् पुष्पं मिथ्यारहितस्य ब्रह्मज्ञानप्रापणे साधनीभूतस्य संन्यासाश्रमविषयकं वरीवति। तस्यास्य संन्यासस्य महत्वं तावाद्भगवता गोपिकाजनचित्तचोरेण गोविन्देन महासङ्गरे पार्थायोपदेशि। तादृशातितरमहत्वो विषय एव नः संस्थाया प्रथमपुष्पत्वेनाद्यत्वे विकसदस्तीत्यहो महत्प्रमोदस्थानम्। तदेत्पुस्तकं साग्निकस्य निरग्निकस्य विशेषेणाग्निहोत्रिणश्च संन्यासग्रहणप्रयोगं

विशदयत्, तेषामनुष्ठानं शरीरोत्तरसंस्कारञ्च विदधत् तुरीयाश्रमवतां महतामुपकाराय कल्पेत इति विश्वसिमः । स चायमस्मद्संस्थया प्रकाशितो ग्रन्थः विदुषां प्रशंसपात्रो भूयादित्याशास्महे ।

स चायं ग्रन्थः अग्रजन्मभिः वासुदेवशास्त्रिभिः नैकेषु श्रुतिस्मृत्यादिग्रन्थेषु सूक्ष्मेक्षिकां सम्पाद्यानवरतपरिश्रमेण महता प्रयासेन च निरमायि । तेषामयं प्रयासःनूनमनुकरणीय एव । स्वस्यायुषि निरलसतया तपाचरणेन अर्जितस्य फलरूपोऽयं ग्रन्थो मुद्राप्य प्रकाशनायानुमतिप्रदानरूपेणानुग्रहीतास्तैर्वयमिति नूनं कार्तज्ञभागिनस्ते विराजन्ते ।

संस्थाया अस्या द्वितीयमपि पुष्पं श्रौतग्रन्थकृतामैतिह्याभिधमनतिकालाभ्यन्तरे एव मनीषिजनार्पणं भविता । श्रौतविषये वृत्तिलक्षणप्रयोगपद्धतिकारिकारूपाणां ग्रन्थकृतां, जनसामान्येषु तेषां देशकालकर्तृत्वादिविषये सर्वथाऽज्ञातृरूपाणां ग्रन्थानवलोक्य तेषामैतिह्यमस्मिन् संहृतं विराजते । सोऽपि ग्रन्थः यावच्छक्यं शैघ्र्येण लोकार्पणं भूयादित्याशास्महे ।

अद्यत्व इयं संस्था उद्यदर्यम्णः बालप्रभेव, कोमलरश्मय इव विराजमाना दृश्यते । गच्छता कालेन संस्थेयं सूर्यप्रभेवाल्पीयस्येव काले प्रखररश्मिरिव प्रबलप्रभा भूयादित्यत्र न मनागपि संशीतिः । संस्थाया अस्याः परिवर्धने बलवर्धने च विदुषां, संशोधकानां, पण्डितप्रवराणां श्रोत्रियाणाञ्चाशिषः शुभेच्छाश्चापेक्ष्यन्ते । तदपि विद्योपासनपक्षपातिभ्यः अवश्यं लभेदित्यत्र नांशतोऽपि सन्देहलवः । अतः संस्थेयं झटिति वर्धमाना वटवृक्षतामियादित्याशास्य विरम्यते विस्तरात् ।

ज्येष्ठ शु ॥ १५ ॥ विद्वच्चरणचञ्चरीकः
शके १९२८ पराञ्जपेकुलजः परशुरामशर्मा
भानुवासरः ।
दि. ११ जून २००६.

ॐ

॥ श्री सद्गुरुचरणारविन्दाभ्यां नमः ॥

तुरीयाश्रमग्रहणप्रयोगः - यतिधर्मसंस्कारश्च

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युः तं नमामि गजाननम् ॥
गुरवे सर्वलोकानां भिषजे भवरोगिणाम् ।
निधये सर्वविद्यानां दक्षिणामूर्तये नमः ॥
विष्णुवृद्धकुलाब्धीन्दुर्मीमांसानयकोविदः ।
वासुदेवः प्रतनुते तुरीयाश्रमपद्धतिम् ॥

संन्यासे अधिकारी

धर्मसिन्धुकारः -

'प्रव्रजेद्ब्रह्मचर्याद्वा प्रव्रजेच्च गृहादपि ।
वनाद्वा प्रव्रजेद्विद्वानातुरो वाथ दुःखितः' ॥

इति वाक्ये आतुरः मुमूर्षुः । दुःखितः चोरव्याघ्रादिभीतः ।

आश्रमसमुच्चयपक्षे याज्ञवल्क्यः -

वनाद्गृहाद्वा कृत्वेष्टिं सार्ववेदसदक्षिणाम् ।
प्राजापत्यां, तदन्ते तानग्नीनारोप्य चात्मनि ॥
अधीतवेदो जपकृत् पुत्रवान् अन्नदोऽग्निमान् ।
शक्त्या च यज्ञकृत् मोक्षे मनः कुर्यात्तु नान्यथा ॥

आश्रमविकल्पपक्षे जाबालश्रुतिः -

'ब्रह्मचर्यं समाप्य गृही भवेत्। गृही भूत्वा वनी भवेत्। वनी भूत्वा प्रव्रजेत्। यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेत्। गृहाद्वा वनाद्वा। अथ पुनः अव्रती वा व्रती वा स्नातको वा अस्नातको वा उत्सन्नाग्निः अनग्निको वा यदहरेव विरजेत् तदहः प्रव्रजेत्' इति।

बौधायनः -

'मुखजानामयं धर्मो यद्विष्णोर्लिङ्गधारणम्।
राजन्यवैश्ययोर्नेति दत्तात्रेयमुनेर्वचः'। इति॥

अत्रैव माधवः -

'ब्राह्मणः क्षत्रियो वाथ वैश्यो वा प्रवृजेद्गृहात्'॥

एतेषां सर्वेषां वचनसारः - ब्रह्मचर्य-गृहस्थ-वानप्रस्थाश्रमान् क्रमशः स्वीकृत्य तत्तदाश्रमधर्मान् अनुष्ठाय पुत्रानुत्पाद्य यज्ञैरिष्ट्वा संन्यासः।

यदहः विरजेत् तदहरेव ब्रह्मचर्यात् - गृहात् - वानप्रस्थात् अन्यतमाश्रमाद्वा संन्यासः। व्रती-अव्रती-स्नातको वा प्रव्रजेत्। उत्सन्नाग्निः अनग्निको वा प्रव्रजेत् - संन्यासं स्वीकुर्यात्।

संन्यासाश्रमे ब्राह्मणानामेवाधिकारः इति बोधायनमतम्। त्रैवर्णिकानां संन्यासे समानः अधिकारः इति माधवमतम्।

अत्र सन्यासे मनूक्तः अधिकारी -

ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत्।
अनपाकृत्य मोक्षस्तु सेव्यमानो व्रजत्यधः॥

ऋणमोचनप्रकारस्तु -

जायमानो वै ब्राह्मणः स्त्रिभिर्ऋणैर्ऋणवान् जायते, यज्ञेन देवेभ्यः प्रजया पितृभ्यः स्वाध्यायेन ऋषिभ्यः॥ तथाहि -

अधीत्य विधिवत् वेदान् पुत्रांश्चोत्पाद्य धर्मतः।
इष्ट्वा च शक्तितो यज्ञैः मनो मोक्षे निवेशयेत्॥

अनधीत्यद्विजो वेदान् अनुत्पाद्य तथा सुतान् ।
अनिष्ट्वा चैव यज्ञैश्च मोक्षमिच्छन् व्रजत्यधः ॥

आतुराणां संन्यासे विशेषः -

' आतुराणां च संन्यासे न विधिर्नैव च क्रिया ।
प्रैषमात्रं समुच्चार्य संन्यासं तत्र कारयेत् ' ॥ इति धर्मसिन्धौ ।
' सदन्ने कदन्ने वापि लोष्ठे वा काञ्चने तथा ।
समबुद्धिर्यस्य शश्वत् स संन्यासीति कीर्तितः ' ॥

उत्तमान्ने - कुत्सितान्ने अश्मनि - सुवर्णे वा यस्य समाना बुद्धिः , सः यो वा को वा भवेत् स एव संन्यासीति हारीतवचनम् । हारीतमतेन चतुर्विधः संन्यासः ।तथा हि -

' कुटीचको बहूदको हंसश्चैव तृतीयकः ।
चतुर्थः परमो हंसः यो यः पश्चात् स उत्तमः ' ॥

कलियुगे कृतः संन्यासनिषेधः त्रिदण्डसंन्यासपरः इति प्राचीनानां मतम् ।

१) कुटीचकसंन्यासलक्षणम् - बहिः कुट्यां गृहे वा वसन् काषायवासाः त्रिदण्डी - शिखायज्ञोपवीतवान् बन्धुषु गृहे वा भुञ्जानः आत्मनिष्ठो यो भवेत् स कुटीचकः ।

२) बहूदकसंन्यासलक्षणम् - पुत्रादीन् हित्वा सप्तागाराणि भैक्ष्यं चरन् पूर्वोक्त- काषायवस्त्रादिवेषधारी यः सः बहूदकः ।

३)हंससंन्यासलक्षणम्- पूर्वोक्तवेषोपि एकदण्डः ।

४) परमहंससंन्यासलक्षणम् - पूर्वोक्तवेषधारी शिखायज्ञोपवीतहीनः एकदण्डी स्यात् । धर्मसिन्धौ तु एवं लक्षणं कीर्तितम् ।

मिताक्षरायां - ' त्रयो दण्डा अस्य सन्तीति त्रिदण्डी - प्राजापत्येष्ट्यनन्तरं त्रीन् वैणवान् दण्डान् मूर्धप्रमाणान् दक्षिणेन पाणिना धारयेत् । सव्येन सोदकं कमण्डलुं धारयेत् । एकदण्डो वा चतुर्थाश्रमं गच्छेत् ब्रह्मविद्यापरायणः ' इति ।

अत्र चात्रेयवचनम् -

' चतुर्धा भिक्षवः प्रोक्ताः सर्वे चैव त्रिदण्डिनः ।

एकदण्डी त्रिदण्डी वा सर्वसङ्गविवर्जितः ' ॥

त्रिदण्डविषये मनुः -

' वाग्दण्डोऽथ मनोदण्डः कर्मदण्डस्तथैव च ।
यस्यैते नियता दण्डाः स त्रिदण्डीति चोच्यते' ॥

अत्र धर्मसिन्धुकारः - हंसपरमहंसयोः शिखायज्ञोपवीतसत्वासत्वाभ्यां भेदः। एकदण्डस्तु द्वयोरपि । परमहंसस्य दण्डधारणं विविदिषादशायां नित्यम् । विद्वत्तादशायां तु कृताकृतम् । न दण्डं न शिखां नाच्छादनं चरति परमहंसः । वैराग्यं विना जीवनाद्यर्थं संन्यासे तु नरकः । तथा हि -

' एकदण्डं समाश्रित्य जीवन्ति बहवो नराः ।
नरके रौरवे घोरे कर्मत्यागात्पतन्ति ते ॥
काष्ठदण्डो धृतो येन सर्वाशी ज्ञानवर्जितः ।
स याति नरकान् घोरान् ..... ॥ इत्यादिस्मरणात् ॥

अथ संन्यासग्रहणप्रयोगः

तत्रोत्तरायणं प्रशस्तम् । आतुरस्य दक्षिणायनेऽपि । तत्रादौ गृह्याग्निमन्तम् , तादृशविधुरं प्रति प्रयोगः - शान्त्यादि लक्षणं गुरुं संशोध्य तन्निकटे त्रिमासं यतिधर्मान् संवीक्ष्य गायत्रीजप-रुद्रजप-कूष्माण्डहोमादिभिः शुद्धिं लब्ध्वा रिक्तायां तिथौ देशकालौ स्मृत्वा संकल्पः - अमुकस्य मम करिष्यमाणसंन्यासे अधिकारार्थं चतुःकृच्छ्रात्मकं प्रायश्चित्तं प्रतिकृच्छ्रं तत्प्रत्याम्नायैकैकगोनिष्क्रयद्रव्यद्वारा अहम् आचरिष्ये । कृच्छ्रप्रत्याम्नायगोनिष्क्रयद्रव्यं विप्रेभ्यो दातुमहमुत्सृजे । इति संकल्पपूर्वकं रजतनिष्कतदर्धं तदर्धान्यतमं प्रति धेनुं दद्यात् ।

अथ कूष्माण्डहोमः

आहिताग्निः आहवनीयं प्रणीय , अनाहिताग्निः औपासनाग्निमुद्धृत्य, विधुरः लौकिकाग्निं संस्थाप्य तैत्तिरीयारण्यकोक्तप्रकारेण द्वितीयप्रपाठकस्य तृतीय-चतुर्थ-पञ्चमानुवाकान् मन्त्रानुषङ्गेन प्रतिमन्त्रं जुहुयादाज्येन । तत्र सङ्कल्पः - ममामुकस्य

संन्यासाश्रमयोग्यतासिध्यर्थं शरीरशुद्ध्यर्थं कूष्माण्डहोमं करिष्ये - अग्निं परिस्तीर्य आज्यं संस्कृत्य - स्रुचि उन्नीय जुहुयात्। प्रत्येकं चतुर्गृहीतं -' यद्देवा इत्यादि पुनर्मनः ' इत्यन्तम् एकपञ्चाशदाहुतीः जुहुयात्।

यद्देवा देवहेळनं देवासश्चकृमा वयम्। आदित्यास्तस्मान्मा मुञ्चतर्तस्यर्तेन मामित स्वाहा ॥ आदित्याय इदं न मम ॥१॥ (तै. आ. २.३)

देवा जीवनकाम्या यद्वाचाऽनृतमूदिम। तस्मान्न इह मुञ्चत विश्वे देवाः सजोषसः स्वाहा ॥ विश्वेभ्यो देवेभ्य इदं न मम ॥२॥

ऋतेन द्यावापृथिवी ऋतेन त्वꣳ सरस्वति। कृतान्नः पाह्येनसो यत्किञ्चानृतमूदिम स्वाहा ॥ द्यावापृथिवीभ्यां० सरस्वत्या इदं न मम ॥३॥

इन्द्राग्नी मित्रावरुणौ सोमो धाता बृहस्पतिः। ते नो मुञ्चन्त्वेनसो यदन्यकृतमारिम स्वाहा ॥ इन्द्राग्निभ्यां० मित्रावरुणाभ्यां० सोमधातृबृहस्पतिभ्य इदं न मम ॥४॥

सजातशꣳसादुत जामिशꣳसाज्ज्यायसः शꣳसादुत वा कनीयसः। अनाधृष्टं देवकृतं यदेनस्तस्मात्त्वमस्माज्जातवेदो मुमुग्धि स्वाहा ॥ जातवेदस इदं न मम ॥५॥

यद्वाचा यन्मनसा बाहुभ्यामूरुभ्यामष्ठीवद्भ्याꣳ शिश्नैर्यदनृतं चकृमा वयम्। अग्निर्मा तस्मादेनसो गार्हपत्यः प्रमुञ्चतु चकृम यानि दुष्कृता स्वाहा ॥ अग्नय इदं न मम ॥६॥

येन त्रितो अर्णवान्निर्बभूव येन सूर्यं तमसो निर्मुमोच। येनेन्द्रो विश्वा अजहादरातीस्तेनाहं ज्योतिषा ज्योतिरानशान आक्षि स्वाहा ॥ दिवि ज्योतिषे परमात्मन इदं न मम ॥७॥ अग्नये वा।

यत्कुसीदमप्रतीतं मयेह येन यमस्य निधिना चरामि। एतत्तदग्ने अनृणो भवामि जीवन्नेव प्रति तत्ते दधामि स्वाहा ॥ अग्नय इदं न मम ॥८॥

यन्मयि माता गर्भे सत्येनश्चकार यत्पिता। अग्निर्मा तस्मादेनसो गार्हपत्यः प्रमुञ्चतु दुरिता यानि चकृम करोतु मार्मनेनसꣳस्वाहा ॥ अग्नय इदं न मम ॥९॥

यदापिपेश मातरं पितरं पुत्रः प्रमुदितो धयन्। अहिꣳसितौ पितरौ मया तत्तदग्ने अनृणो भवामि स्वाहा ॥ अग्नय इदं न मम ॥१०॥

यदन्तरिक्षं पृथिवीमुत द्यां यन्मातरं पितरं वा जहिꣳसिम। अग्निर्मा

तस्मादेनसो गार्हपत्यः प्रमुञ्चतु दुरिता यानिं चकृम करोतु मामनेहसꣳस्वाहा ॥ अग्नय इदं न मम ॥११॥

यदाशसा निशसा यत्परा॒शसा यदेनश्चकृमा नूतनं यत्पुराणम्। अग्निर्मा तस्मादेनसो गार्हपत्यः प्रमुञ्चतु दुरिता यानि चकृम करोतु मामनेनसꣳस्वाहा ॥ अग्नय इदं न मम ॥१२॥

अतिक्रामामि दुरितं यदेनो जहामि रिप्रं परमे सधस्थे। यत्र यन्ति सुकृतो नापिं दुष्कृतस्तमारोहामि सुकृतां नु लोकꣳस्वाहा ॥ अग्नय इदं न मम ॥१३॥

त्रिते देवा अमृजतैतदेनस्त्रित एतन्मनुष्येषु मा मृजे। ततो मा यदि किञ्चिदा- नशे। अग्निर्मा तस्मादेनसो गार्हपत्यः प्रमुञ्चतु दुरिता यानिं चकृम करोतु मामनेनस- ꣳस्वाहा ॥ अग्नय इदं न मम ॥१४॥

दिवि जाता अप्सु जाता या जाता ओषधीभ्यः। अथो या अग्निजा आपस्ता नः शुन्धन्तु शुन्धनीः स्वाहा ॥ अग्नय इदं न मम॥१५॥

यदापो नक्तं दुरितं चरामि यद्वा दिवा नूतनं यत्पुराणम्। हिरण्यवर्णास्तत उत्पुनीत नः स्वाहा ॥ अग्नय इदं न मम ॥१६॥

इमं मे वरुण श्रुधी हवं मद्या च मृडय। त्वामवस्यु राचके स्वाहा ॥ वरुणायेदं न मम ॥१७॥

तत्त्वा यामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः। अहेडमानो वरुणेह बोध्युरुशꣳस मा न आयुः प्रमोषीः स्वाहा ॥ वरुणायेदं न मम ॥१८॥

त्वं नो अग्ने वरुणस्य विद्वान् देवस्य हेडोऽव यासिसीष्ठाः। यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषाꣳसि प्र मुमुग्ध्यस्मत्स्वाहा ॥अग्निवरुणाभ्यामिदं न मम ॥१९॥

स त्वन्नो अग्नेऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ। अव यक्ष्व नो वरुणꣳ रराणो वीहि मृडीकꣳ सुहवो न एधि स्वाहा ॥ अग्निवरुणाभ्यामिदं न मम ॥२०॥

त्वमग्ने अयाऽस्यया सन् मनसा हितः। अया सन् हव्यमूहिषेऽयानो धेहि

भेषजꣳ स्वाहा ॥ अग्नय इदं न मम ॥२१॥

यददीव्यन्नृणमहं बभूवाऽदित्सन् वा संजगरजनेभ्यः । अग्निर्मा तस्मादिन्द्रश्च संविदानौ प्रमुञ्चता स्वाहा ॥ अग्नीन्द्राभ्यामिदं न मम ॥२२॥

यद्धस्ताभ्यां चकर किल्बिषाण्यक्षाणां वग्नुमुपजिघ्रमानः । उग्रं पश्या च राष्ट्रभृच्च तान्यप्सरसावनुदत्तामृणानि स्वाहा ॥ उग्रंपश्याराष्ट्रभृद्भ्याम् अप्सराभ्यामिदं न मम ॥२४॥

अवते हेळो वरुण नमोभिरव यज्ञेभिरीमहे हविर्भिः । क्षयन्नस्मभ्यमसुरप्रचेतो राजन्नेनाꣳ सि शिश्रथः कृतानि स्वाहा ॥ वरुणायेदं न मम ॥२५॥

उदुत्तमं वरुण पाशमस्मदवाऽधमं वि मध्यमꣳश्रथाय । अथावयमादित्यव्रते तवाऽनागसो अदितये स्याम स्वाहा ॥ वरुणायेदं न मम ॥२६॥

इमं मे वरुण श्रुधी हवं मद्या च मृडय । त्वामवस्यु राचके स्वाहा ॥ वरुणायेदं न मम ॥२७॥

तत्त्वा यामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः । अहेडमानो वरुणेह बोध्युरुशꣳस मा न आयुः प्रमोषीः स्वाहा ॥ वरुणायेदं न मम ॥२८॥

त्वं नो अग्ने वरुणस्य विद्वान् देवस्य हेडोऽव यासिसीष्ठाः । यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषाꣳसि प्र मुमुग्ध्यस्मत्स्वाहा ॥ अग्निवरुणाभ्यामिदं न मम ॥२९॥

स त्वन्नो अग्नेऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ । अव यक्ष्व नो वरुणꣳ रराणो वीहि मृळीकꣳ सुहवो न एधि स्वाहा ॥ अग्निवरुणाभ्यामिदं न मम ॥३०॥

सं कुसुको वि कुसुको निर्ऋथो यश्च निस्वनः । तेऽस्मद्यक्ष्ममनागसो दूरादूरमचीचतꣳस्वाहा ॥ देवेभ्य इदं न मम ॥३१॥

निर्यक्ष्ममचीचते कृत्यां निर्ऋतिं च । तेन योऽस्मत् समृच्छातै तमस्मै प्रसुवामसि स्वाहा । देवेभ्य इदं न मम ॥३२॥

दुःशꣳ सानुशꣳसाभ्यां घृणेनाऽनुघृणेन च । तेनान्योऽस्मत् समृच्छातै

तमस्मै प्रसुवामसि स्वाहा ॥ देवेभ्य इदं न मम ॥३३॥

सं वर्चसा पयसा सं तनूभिरगन्महि मनसा सꣳशिवेन । त्वष्टा नो अत्र विदधातु रायोऽनुमार्ष्टु तन्वो यद्विलिष्टꣳस्वाहा ॥ त्वष्ट्र इदं न मम ॥३४॥

आयुष्टे विश्वतो दधदयमग्निर्वरेण्यः । पुनस्ते प्राण आयाति परा यक्ष्मꣳसुवामि ते स्वाहा । अग्नय इदं न मम ॥३५॥

आयुर्दा अग्ने हविषो जुषाणो घृतप्रतीको घृतयोनिरेधि । घृतं पीत्वा मधु चारु गव्यं पितेव पुत्रमभिरक्षतादिमꣳस्वाहा ॥ अग्नय इदं न मम ॥३६॥

इममग्न आयुषे वर्चसे कृधि तिग्ममोजो वरुण सꣳशिशाधि । मातेवाऽस्मा अदिते शर्म यच्छ विश्वेदेवा जरदष्टिर्यथाऽसत् स्वाहा ॥ अग्निवरुणादिति विश्वेभ्यो देवेभ्य इदं न मम ॥३७॥

अग्न आयूꣳषि पवस आसुवोर्जमिषं च नः । आरे बाधस्व दुच्छुनाꣳस्वाहा ॥ अग्नय इदं न मम ॥३८॥

अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यम् । दधद्रयिं मयि पोषꣳस्वाहा ॥ अग्नय इदं न मम ॥३९॥

अग्निर्ऋषिः पवमानः पाञ्चजन्यः पुरोहितः । तमीमहे महागयꣳस्वाहा ॥अग्नय इदं न मम ॥४०॥

अग्ने जातान् प्रणुदा नः सपत्नान् प्रत्यजाताञ्जातवेदो नुदस्व । अस्मे दीदिहि सुमना अहेळञ्छर्मन् ते स्याम त्रिवरूथ उद्भौ स्वाहा ॥ जातवेदसेऽग्नय इदं न मम ॥४१॥

सहसा जातान् प्रणुदा नः सपत्नान् प्रत्यजाताञ्जातवेदो नुदस्व । अधि नो ब्रूहि सुमनस्यमानो वयꣳस्याम प्रणुदानः सपत्नान्स्वाहा ॥ जातवेदसेऽग्नय इदं न मम ॥४२॥

अग्ने यो नोऽभितो जनो वृको वरो जिघाꣳसति । ताꣳस्त्वं वृत्रहन् जहि वस्वमस्मभ्यमाभर स्वाहा ॥ अग्नीन्द्राभ्यामिदं न मम ॥४३॥

अग्ने यो नोऽभिदासति समानो यश्च निष्ट्यः । तं वयꣳसमिधं कृत्वा तुभ्यमग्नेऽपिद -

ध्मसि स्वाहा ॥ अग्नय इदं न मम ॥४४॥

यो नः शपादशपतो यश्च नः शपतः शपात्। उषाश्च तस्मै निम्रुक्च सर्वं पाप-
ऽसम्मूहताऽस्वाहा ॥ देवेभ्य इदं न मम ॥४५॥

यो नः सपत्नो यो रणो मर्तोऽभिदासति देवाः। इध्मस्येव प्रक्षायतो मातस्यो-
च्छेषि किञ्चन स्वाहा ॥ देवेभ्य इदं न मम ॥४६॥

यो मां द्वेष्टि जातवेदो यं चाहं द्वेष्मि यश्च माम्। सर्वाऽस्तानग्ने सन्दह
याऽश्चाहं द्वेष्मि ये च माऽस्वाहा ॥ अग्नय इदं न मम ॥४७॥

यो अस्मभ्यमरातीयाच्च नो द्वेषते जनः। निन्दाद्यो अस्मान् दिप्साच्च
सर्वाऽस्तान् मष्मषा कुरु स्वाहा ॥ अग्नय इदं न मम ॥ ४८॥

सऽशितं मे ब्रह्म सऽशितं वीर्यं१बलम्। सऽशितं क्षत्रं मे जिष्णु
यस्याहमस्मि पुरोहितः स्वाहा ॥ अग्नय इदं न मम ॥ ४९॥

उदेषां बाहू अतिरमुद्वर्चो अथो बलम्। क्षिणोमि ब्रह्मणाऽमित्रानुन्नयामि
स्वाऽहऽस्वाहा ॥ अग्नय इदं न मम ॥५०॥

पुनर्मनः पुनरायुर्म आगात्पुनश्चक्षुः पुनःश्रोत्रं म आगात् पुनः प्राणः
पुनराकूतं म आगात्पुनश्चित्तं पुनराधीतं म आगात्। वैश्वानरो मेऽदब्धस्तनूपा
अवबाधतां दुरितानि विश्वा स्वाहा ॥ अग्नये वैश्वानरायेदं न मम ॥५१॥
एतैः त्रिभिरनुवाकैः एकपञ्चाषन्मन्त्रैः जुहुयात्। अथोपतिष्ठेत्-षष्ठेनानुवाकेन
त्रयोदशमन्त्रैः ॥

वैश्वानराय प्रतिं वेदयामो यदीं नृणऽसंगरो देवतासु। स एतान् पाशान्
प्रमुञ्चन् प्रवेद स नो मुञ्चतु दुरितादवद्यात् ॥१॥

वैश्वानरः पर्वयान्नः पवित्रैर्यत्संगरमभिधावाम्याशाम्। अनाजानन् मनसा
याचमानो यदत्रैनो अवतत्सुवामि ॥२॥

अमीये सुभगे दिवि विचृतौ नाम तारके। प्रेहामृतस्य यच्छतामेतद्बद्धक-
मोचनम् ॥३॥

विजिहीर्ष्व लोकान् कृधि बन्धान् मुञ्चासि बद्धकम्। योनेरिव प्रच्युतो गर्भः

सर्वान् पथो अनुष्व ॥४॥

स प्रजानन् प्रतिगृभ्णीत विद्वान् प्रजापतिः प्रथमजा ऋतस्य । अस्माभिर्दत्तं जरसः परस्तादच्छिन्नं तन्तुमनुसंचरेम ॥५॥

ततं तन्तुमन्वेके अनुसंचरन्ति येषां दत्तं पित्र्यमायनवूत् । अवन्ध्वेके ददतः प्रयच्छाद्दातुं चेच्छेक्नवाऽस स्वर्ग एषाम् ॥६॥

आरभेथामनुसऽरभेथाऽसमानं पन्थामवथो घृतेन । यद्वां पूर्तं परिविष्टं यदग्नौ तस्मै गोत्रायेह जायापती सऽरभेथाम् ॥७॥

यदन्तरिक्षं पृथिवीमुत द्यां यन्मातरं पितरं वा जिहिऽसिम । अग्निर्मा तस्मादेनसो गार्हपत्य उन्नो नेषद् दुरिता यानि चकृम ॥८॥

भूमिर्माताऽदितिर्नो जनित्रं भ्राताऽन्तरिक्षमभिशस्त एनः । द्यौर्नः पिता पितृयाच्छं भवासि जामि मित्वा मा विवित्सि लोकात् ॥९॥

यत्र सुहार्दः सुकृतो मदन्ते विहाय रोगं तन्वा१ऽस्वायाम् । अश्लोणाङ्गैः रहुंताः स्वर्गे तत्र पश्येम पितरं च पुत्रम् ॥१०॥

यदन्नमद्यनृतेन देवा दास्यन्नदास्यन्नुत वाऽकरिष्यन् । यद्देवानां चक्षुष्यागो अस्ति यदेव किञ्च प्रतिजग्राहमग्निर्मा तस्मादनृणं कृणोतु ॥११॥

यदन्नमद्मि बहुधा विरूपं वासो हिरण्यमुत गामजामविम् । यद्देवानां चक्षुष्यागो अस्ति यदेव किञ्च प्रतिजग्राहमग्निर्मा तस्मादनृणं कृणोतु ॥१२॥

यन्मया मनसा वाचाकृतमेनः कदाचन । सर्वस्मात्तस्मान्मेडितो मोग्नि त्वऽहि वेत्थ यथातथम् ॥१३॥

अथ कूष्माण्डविधायकारण्यकम्

वातरशना ह वा ऋषयः श्रमणा ऊर्ध्वमन्थिनो बभूवुस्तान् ऋषयोऽर्थमायऽस्ते निलायमचरूऽस्तेऽनुप्रविषु कूष्माण्डानि ताऽस्तेष्वन्वविन्दञ्छ्रद्धया च तपसा च । तानृषयोऽब्रुवन्कथा निलयं चरथेति त ऋषीनब्रुवन्नमो वोऽस्तु भगवन्तोऽस्मिन्धाम्नि केन वः सपर्यामेति तानृषयोऽब्रुवन्पवित्रंन्नो ब्रूत येनरिपसः स्यामेति त एतानि

सूक्तान्यपश्यन् यद्देवादेवहळनं, यददीव्यन् नृणमहं बभूवऽऽर्युष्टे विश्वतो दधरित्येतैराज्यं जुहुत वैश्वानराय प्रतिं वेदयाम इत्युप तिष्ठत यदर्वाचीनमेनो भ्रूणहत्यायास्तस्मान्मोक्ष-ध्वमिति। एतैरजुहवुस्तेऽरेपसोऽभवन्। कर्मादिष्वेतैर्जुहुयात्पूतो देवलोकान्समश्नुते॥

कूष्माण्डैर्जुहुयाद्यांऽपूत इव मन्येत। यथा स्तेनो यथा भ्रूणहैवमेष भवति योऽ-योनौ रेतः सिञ्चति। यदर्वाचीनमेनो भ्रूणहत्यायास्तस्मान्मुच्यते। यावदेनो दीक्षामुपैति दीक्षित एतैः संतति जुहोति। मासं दीक्षितो भवति यो मासः स संवत्सरः संवत्सरादेवा ऽऽत्मनं पुनीते॥ तिस्रो रात्रीर्दीक्षितो भवति त्रिपदा गायत्री गायत्रिया एवाऽऽत्मानं पुनीते॥ न माꣳसमश्नीयात् न स्त्रियमुपेयात् नोपर्यासीत जुगुप्सेतानृतात्॥

पयो ब्राह्मणस्य व्रतं यवागू राजन्यस्याऽऽमीक्षा वैश्यस्य। यदि मन्येतोपद-स्यामीति ओदनं धानाः सक्तून् घृतमित्यनुव्रतयेदात्मनोऽनुपदासाय॥

इति कूष्माण्डविधायकारण्यम्

एवं कूष्माण्डहोमं कृत्वा कृच्छ्राचरणान्ते मासं त्रिरात्रं वा उक्तविधानेन व्रतमाचरेत्।

व्रतान्ते - संन्यासस्वीकारः। तत्रोत्तरायणं प्रशस्तम्। आतुरस्य दक्षिणायन-मपि॥ एकादश्यां वा द्वादश्यां वा यथा ब्रह्मरात्रिः स्यात्तथा श्राद्धमारभेत्। स्वस्य नवश्राद्धषोडशश्राद्धसपिण्डीकरणानि पार्वणविधिना साग्निकः कुर्यात्। निरग्निकः एकोद्दिष्टविधिना कुर्यात्॥

अथाष्टौ श्राद्धानि -

तत्र आपस्तम्बहिरण्यकेशीयादीनाम् अग्नौकरणपिण्डादिरहितः सांकल्पिक-प्रयोगः। आश्वलायनादीनां सपिण्डकः पार्वणप्रयोगः। तत्र आदौ सव्येन सयवजलेन श्राद्धाङ्गतर्पणं सर्वेषां समानम्॥

अमुकस्य मम संन्यासाश्रमप्रवेशांगत्वेन अष्टौ श्राद्धाङ्गतर्पणानि करिष्ये इति संकल्पः।

ब्रह्माणं तर्पयामि। विष्णुं तर्पयामि। महेश्वरं तर्पयामि। देवर्षीन् तर्पयामि। ब्रह्मर्षीन् तर्पयामि। क्षत्रर्षीन् तर्पयामि। वसून् तर्पयामि। रुद्रान् तर्पयामि।

आदित्यान् तर्पयामि । सनकं तर्पयामि । सनन्दनं तर्पयामि । सनातनं तर्पयामि । पञ्चमहाभूतानि तर्पयामि । चक्षुरादिकरणानि तर्पयामि । भूतग्रामं तर्पयामि । पितरं तर्पयामि । पितामहं तर्पयामि । प्रपितामहं तर्पयामि । मातरं तर्पयामि । पितामहीं तर्पयामि । प्रपितामहीं तर्पयामि । आत्मानं तर्पयामि । पितरं तर्पयामि । पितामहं तर्पयामि । इति नद्यादौ श्राद्धांगतर्पणानि कृत्वा गृहमागत्य देशकालौ स्मृत्वा करिष्यमाणसंन्यासाङ्गत्वेनाष्टौ श्राद्धानि पार्वणविधिना अन्नेन आमेन वा करिष्ये इति संकल्पं कृत्वा क्षणं दद्यात् ॥ सर्वं नान्दीश्राद्धवत् कुर्यात् । युग्मा विप्राः । द्वौ विप्रौ देवस्थाने । अष्टसु श्राद्धेषु पितृस्थानेषु षोडश । एवं अष्टादश भवन्ति ।

स्मृत्यर्थसारे -

'एकोद्दिष्टविधानेन कुर्यात्च्छ्राद्धानि षोडश ।
अग्रिमान् पार्वणेनैव विधिना निर्वपेत् स्वयम् '॥

बौधायनः -

कृत्वा श्राद्धानि सर्वाणि पित्रादिभ्योऽष्टकं पृथक् ।
वापयित्वा तु केशादीन् मार्जयेन्मातृका इमाः ॥
सदैवमार्षकं दिव्यं पित्र्यं मातृकमानुषे ।
भौतिकं चात्मनश्चान्ते अष्टौ श्राद्धानि निर्वपेत् ॥

एतेषु श्राद्धेषु अपसव्यं नास्ति । तिलस्थाने सर्वत्र यवाः ॥

१) प्रथमे देवश्राद्धे - सत्यवसुसंज्ञकाः क्रतुदक्षसंज्ञका वा विश्वेदेवाः नान्दीमुखाः स्थाने क्षणः कर्तव्यः । इति एकं वृत्वा द्वितीयं वृणुयात् । ब्रह्मविष्णुमहेश्वरा नान्दीमुखाः स्थाने क्षणः कर्तव्यः । एवं द्वितीयम् ॥

२) द्वितीये ऋषिश्राद्धे - देवर्षिब्रह्मर्षिक्षत्रर्षयः नान्दीमुखाः स्थाने क्षणः कर्तव्यः । एवं द्वितीयम् ।

३) तृतीये दिव्यश्राद्धे - वसुरुद्रादित्या नान्दीमुखाः स्थाने क्षणः कर्तव्यः । एवं द्वितीयम् ।

४) चतुर्थे मनुष्यश्राद्धे - सनकसनन्दनसनातना नान्दीमुखाः स्थाने क्षणः कर्तव्यः ।

एवं द्वितीयम् ।

५) पञ्चमे भूतश्राद्धे - पृथिव्यादिपञ्चमहाभूतान्येकादशकरणानिचतुर्विधभूतग्रामा नान्दीमुखाः स्थाने क्षणः कर्तव्यः । एवं द्वितीयम् ।

६) षष्ठे पितृश्राद्धे - पितृपितामहप्रपितामहा नान्दीमुखाः स्थाने क्षणः कर्तव्यः । एवं द्वितीयम् ।

७) सप्तमे मातृश्राद्धे - मातृपितामहीप्रपितामह्यो नान्दीमुखाः स्थाने क्षणः कर्तव्यः । एवं द्वितीयम् ।

८) अष्टमे आत्मश्राद्धे - आत्मपितृपितामहा (इति वा)आत्मान्तरात्मापरमात्मा (इति वा) नान्दीमुखाः स्थाने क्षणः कर्तव्यः । एवं द्वितीये ।

(अत्र च मीमांसा - बौधायनवचनेन मातृश्राद्धे सप्तमे सुवासिन्यो भवेयुरिति प्रतिभाति वापनमार्जनभेदनिर्देशात् ''इमाः''इति स्त्रीलिङ्गनिर्देशाच्च ॥)

सर्वेषां पाद्यं दत्वा प्राङ्मुखान् उदक्संस्थान् उपावेश्य प्रार्थयेत् -

' संन्यासार्थमहं श्राद्धं कुर्वे ब्रूत द्विजोत्तमाः ।
अनुज्ञां प्राप्य युष्माकं सिद्धिं प्राप्स्यामि शाश्वतीम् '॥कुरु इति प्रत्युक्तःसन् सयवऋजुदूर्वादियुग्मेन अब्दानपूर्वकं सम्बुध्यन्तेन आसनानि दद्यात् -

१) सत्यवसुसंज्ञका / क्रतुदक्षसंज्ञका विश्वेदेवाः नान्दीमुखाः इदमासनम् ।

२) ब्रह्मविष्णुमहेश्वरा नान्दीमुखाः इदमासनम् ।

३) देवर्षिब्रह्मर्षिक्षत्रर्षयः नान्दीमुखाः इदमासनम् ।

४) वसुरुद्रादित्या नान्दीमुखाः इदमासनम् ।

५) सनकसनन्दनसनातनाः नान्दीमुखाः इदमासनम् ।

६) पृथिव्यादिपञ्चभूतानि एकादशचक्षुरादिकरणानि चतुर्विधभूतग्रामा नान्दीमुखाः इदमासनम् ।

७) पितृपितामहप्रपितामहा नान्दीमुखाः इदमासनम् ।

८) मातृपितामहीप्रपितामह्यः नान्दीमुखाः इदमासनम् ।

९) आत्मपितृपितामहा/आत्मान्तरात्मा परमात्मा नान्दी मुखा इदमासनम्।
इति आसनानि दत्वा अर्घ्यपात्रासादनम्।

आपस्तम्बादीनां सांकल्पिकत्वान्नार्घ्यम्। अन्येषां देवार्थमेकम्। पार्वणार्थमष्टौ। नवपात्रासादनम्। सर्वत्र शन्नो देवीति उदकपूरणान्तं कृत्वा देवपात्रे - यवोऽसि धान्यराजो वा वारुणो मधुसंयुतः। निर्णोदः सर्वपापानां पवित्रमृषिभिः स्मृतम्॥ इति यवानुप्य अन्येष्वष्टपात्रेषु तिलोसीति मन्त्रस्य ऊहेन यवानुपवपेत्। तद्यथा - यवोऽसि सोमदेवत्यो गोसवे देवनिर्मितः।

१) प्रत्नवद्भिः प्रत्त पुष्ट्या नान्दीमुखान् देवान् प्रीणयाहि नः स्वाहा नमः।
२) नान्दीमुखान् ऋषीन् प्रीणयाहि नः स्वाहा नमः।
३) नान्दीमुखान् दिव्यान् प्रीणयाहि नः स्वाहा नमः।
४) नान्दीमुखान् मनुष्यान् प्रीणयाहि नः स्वाहा नमः।
५) नान्दीमुखानि भूतानि प्रीणयाहि नः स्वाहा नमः।
६) नान्दीमुखान् पितॄन् प्रीणयाहि नः स्वाहा नमः।
७) नान्दीमुखान् मातृः प्रीणयाहि नः स्वाहा नमः।
८) नान्दीमुखान् आत्मनः प्रीणयाहि नः स्वाहा नमः।

एकैकं पात्रं द्विधा विभज्य या दिव्या इति मन्त्रान्ते -

१) विश्वेदेवा नान्दीमुखा इदं वो अर्घ्यं स्वाहा नमः इति प्रत्येकं दद्यात्
२) ब्रह्मविष्णुमहेश्वरा नान्दीमुखा इदं वो अर्घ्यं स्वाहा नमः।
३) देवर्षिब्रह्मर्षिक्षत्रर्षयः नान्दीमुखा इदं वो अर्घ्यं स्वाहा नमः।
४) वसुरुद्रादित्याः नान्दीमुखा इदं वो अर्घ्यं स्वाहा नमः।
५) सनकसनन्दनसनातनाः नान्दीमुखा इदं वो अर्घ्यं स्वाहा नमः।
६) पृथिव्यादिपञ्चमहाभूतानि एकादशचक्षुरादिकरणानि चतुर्विधभूतग्रामा नान्दीमुखा इदं वो अर्घ्यं स्वाहा नमः।
७) पितृपितामहप्रपितामहाः नान्दीमुखा इदं वो अर्घ्यं स्वाहा नमः।

८) मातृपितामहीप्रपितामह्यः नान्दीमुखा इदं वो अर्घ्यं स्वाहा नमः ।

९) आत्मपितृपितामहा / आत्मान्तरात्मापरमात्मा नान्दीमुखा इदं वो अर्घ्यं स्वाहा नमः ।

पात्रं न्युब्जीकृत्य गन्धाद्याच्छादनान्ताः पूजाः सर्वत्र नान्दीमुखा इति विशेषणान्तेन सम्बुध्यन्तेन उच्चारः ।। भोजनपात्रमासाद्य ब्रह्मादिषोडषविप्रकरेष्वग्नये कव्यवाहनाय स्वाहा । सोमाय पितृमते स्वाहा । इति आहुतिद्वयं दद्यात् ।।

उपस्तीर्यान्नं परिवेष्य - अन्नाभावे आमं, तन्निष्क्रयं वा प्रोक्ष्य पृथिवी ते पात्रमित्यादिना यथादेवतम् अन्नादीनां समर्पणम् । ब्रह्मार्पणान्तं कृत्वा अनेना-ष्टश्राद्धेन नान्दीमुखा देवादयः प्रीयन्ताम् ।

अपोशनदानान्ते बलिदानं वर्ज्यं भुञ्जेयुः । तृप्तेषु - उपास्मै०

अक्षन्नमी० सम्पन्नमिति पृष्टे रुचिरमिति सर्वे ब्रूयुः । नेदमामान्ने ।।

आचान्तेषु यवलाजदधिबदरियुतान्नेन अष्टचत्वारिंशत् पिण्डान् कृत्वा प्रागायता उदक्संस्था अष्टौ रेखाः कृत्वा अभ्युक्ष्य कुशान् दूर्वान् वा आस्तीर्य पिण्डस्थाने चतुर्विंशतौ जलं सिञ्चेत् । तद्यथा -

★ १) शुन्धन्तां ब्रह्माणो नान्दीमुखाः २) शुन्धन्तां विष्णवो नान्दीमुखाः
३) शुन्धन्तां महेश्वरा नान्दीमुखाः इति प्रथमरेखायाम् ।

★ ४) शुन्धन्तां देवर्षयो नान्दीमुखाः ५) शुन्धन्तां ब्रह्मर्षयो नान्दीमुखाः
६) शुन्धन्तां क्षत्रर्षयो नान्दीमुखाः इति द्वितीयरेखायाम् ।

★ ७) शुन्धन्तां वसवो नान्दीमुखाः ८) शुन्धन्तां रुद्राः नान्दीमुखाः
९) शुन्धन्ताम् आदित्या नान्दीमुखाः इति तृतीयरेखायाम् ।

★ १०) शुन्धन्तां सनकाः नान्दीमुखाः ११) शुन्धन्तां सनन्दनाः नान्दीमुखाः
१२) शुन्धन्तां सनातनाः नान्दीमुखाः इति चतुर्थरेखायाम् ।

★ १३) शुन्धन्तां पृथिव्यादिपञ्चभूतानि नान्दीमुखानि ।
१४) शुन्धन्तां एकादशचक्षुरादिकरणानि नान्दीमुखानि ।
१५) शुन्धन्तां चतुर्विधाः भूतग्रामाः नान्दीमुखाः इति पञ्चमरेखायाम् ।

★ १६) शुन्धन्तां पितरः नान्दीमुखाः १७) शुन्धन्तां पितामहाः नान्दीमुखाः
१८) शुन्धन्तां प्रपितामहाः नान्दीमुखाः इति षष्ठरेखायाम् ।
★ १९) शुन्धन्तां मातरः नान्दीमुखाः २०) शुन्धन्तां पितामह्यः नान्दीमुखाः
२१) शुन्धन्तां प्रपितामह्यः नान्दीमुखाः इति सप्तमरेखायाम् ।
★ २२) शुन्धन्तां आत्मानः नान्दीमुखाः २३) शुन्धन्तां पितरः नान्दीमुखाः /
अन्तरात्मानः नान्दीमुखाः
२४) शुन्धन्तां पितामहाः नान्दीमुखाः / परमात्मानः नान्दीमुखाः इति
अष्टमरेखायाम् ।
ततः स्वाहान्तेन पिण्डं जलसेचन क्रमेण दद्यात् । तद्यथा -
★ १) ब्रह्मणे नान्दीमुखाय स्वाहा २) विष्णवे नान्दीमुखाय स्वाहा
३) महेश्वराय नान्दीमुखाय स्वाहा
★ ४) देवर्षिभ्यो नान्दीमुखेभ्यः स्वाहा ५) ब्रह्मर्षिभ्यो नान्दीमुखेभ्यः स्वाहा
६) क्षत्रर्षिभ्यो नान्दीमुखेभ्यः स्वाहा
★ ७) वसुभ्यो नान्दीमुखेभ्यः स्वाहा ८) रुद्रेभ्यो नान्दीमुखेभ्यः स्वाहा
९) आदित्येभ्यो नान्दीमुखेभ्यः स्वाहा
★ १०) सनकाय नान्दीमुखाय स्वाहा ११) सनन्दनाय नान्दीमुखाय स्वाहा
१२) सनातनाय नान्दीमुखाय स्वाहा
★ १३) पृथिव्यादिभ्यः पञ्चमहाभूतेभ्यः नान्दीमुखेभ्यः स्वाहा १४) एकादशेभ्यः
चक्षुरादिकरणेभ्यः नान्दीमुखेभ्यः स्वाहा १५) चतुर्विधेभ्यः भूतग्रामेभ्यः स्वाहा
★ १६) पित्रे नान्दीमुखाय स्वाहा १७) पितामहाय नान्दीमुखाय स्वाहा
१८) प्रपितामहाय नान्दीमुखाय स्वाहा
★ १९) मात्रे नान्दीमुखायै स्वाहा २०) पितामह्यै नान्दीमुखायै स्वाहा
२१) प्रपितामह्यै नान्दीमुखायै स्वाहा
(अत्र विशेषः - विमाता सपत्नमाता यदि स्यात् - द्विवचन-बहुवचना-
न्तेन वा यथा संख्यम् ऊहः कर्तव्यः)।

★ २२) आत्मने नान्दीमुखायस्वाहा। २३) पित्रे/अन्तरात्मने नान्दीमुखाय ।
२४) पितामहाय / परमात्मने नान्दीमुखाय स्वाहा ॥

एवं चतुर्विंशतिस्थानेषु समन्त्रकं एकैकं पिण्डं दत्वा तूष्णीं द्वितीयं दद्यात्। अत्र पितरो मादयध्वम्। शुन्धन्ताम् इत्यन्तं कृत्वा तन्त्रेण अञ्जनाभ्यञ्जनं पिण्डपूजनं नमस्कारं च कुर्यात्। अष्टौ श्राद्धानि सम्पन्नानि, विसृज्य पिण्डानि , विप्रेभ्यो दक्षिणादितन्त्रम् ॥

आपस्तम्बादीनां न पिण्डदानं, सांकल्पिकत्वात्। आयनान्तानां कात्यायनादीनां आश्वलायनवत् ॥

अष्टश्राद्धानन्तरं तद्दिने द्वितीये वा दिने षट् शिखाकेशान् स्थापयित्वा कक्षोपस्थवर्जं केश-श्मश्रु-नखादि-वापयित्वा स्नात्वा श्वेतवस्त्रधारणम्। कौपीनाच्छादनानि होमद्रव्याणि ऋत्विग्दक्षिणां विना अन्यद्धनानि स्वत्वानि सर्वाणि विप्रादिभ्यः पुत्रादिभ्यः त्यजेत्। स्वस्य कौपीनादिकं गैरिकरञ्जितं कृत्वा वैणवं दण्डं सत्वचं शिरोभ्रू-ललाटान्यतमप्रमाणं समूलम् अंगुलिस्थूलं विप्रानीतं दश-नव-चतुः-सप्तान्यतम- पर्वकं पर्वग्रन्थियुतं मुद्रायुतं सम्पाद्य शंखोदकेन प्रणव-पुरुषसूक्त-केशवादिनामभिः अभिषिच्य स्थापयेत्। तेन साकं कमण्डलु-कौपीन-आच्छादन-कन्था-पादुकाः स्थाप- येत्। शिक्या-पात्रादिकमपि केचित्।

अथ सावित्रप्रवेशः

देशकालौ संकीर्त्य शेषदुःखनिवृत्तिनिरतिशयानन्दप्राप्तिपरमपुरुषार्थप्राप्तये-कुटीचक/ बहूदक/ हंस/ परमहंस अन्यतमाख्यसंन्यासग्रहणं करिष्ये, तदङ्गतया गणपतिपूजनं पुण्याहवाचनं मातृकापूजनं नान्दीश्राद्धानि करिष्ये। तानि कृत्वा जपेत् ब्रह्मणे नमः, विष्णवे नमः, रुद्राय नमः, सूर्याय नमः, सोमाय नमः, आत्मने नमः, अन्तरात्मने नमः, परमात्मने नमः।

अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्। होतारं रत्नधातमम् ॥ इषे त्वोर्जेत्वा० ।
अग्न आयाहि वीतये गृणानो हव्यदातये। नि होता सत्सि बर्हिषि ॥

शन्नो देवीरभिष्टय आपो भवन्तु पीतये। शं योरभिस्रवन्तु नः ॥ इति जपित्वा सक्तु-पिष्टं मुष्टित्रयं प्रणवेन त्रिः प्राश्य नाभिमालभेत् - आत्मने स्वाहा, अन्तरात्मने स्वाहा, परमात्मने स्वाहा, प्रजापतये स्वाहा इति। ततः पयोदधिमिश्रं जलं आज्यं वा प्राशयेत्। त्रिवृदसि इति प्रथमम्। प्रवृदसि इति द्वितीयम्। विवृदसि इति तृतीयम्। 'ततः आपः पु नन्त्विति' जलमभिमन्त्र्य प्राश्याचम्य उपवासं करिष्ये इति संकल्पयेत् ॥

आपः पुनन्तु पृथिवीं पृथिवी पूता पुनातु माम्। पुनन्तु ब्रह्मणस्पतिर्ब्रह्मपूता पुनातु माम्। यदुच्छिष्टमभोज्यं यद्वा दुश्चरितं मम। सर्वं पुनन्तु ममापोऽसतां च प्रति-ग्रहं स्वाहा ॥ इति जलं प्राशयेत् ॥

ॐ भूः सावित्रीं प्रविशामि। ॐ तत्सवितुर्वरेण्यम्। ॐ भुवः सावित्रीं प्रविशामि। ॐ भर्गो देवस्य धीमहि। ॐ स्वः सावित्रीं प्रविशामि। ॐ धियो यो नः प्रचोदयात्। ॐ भूर्भुवस्स्वः सावित्रीं प्रविशामि। ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात् ॥

ततः सूर्यास्तात् गृह्याग्निं समिंध्य - (विच्छिन्नश्चेत् सन्धानविधिना पुनः-सन्धानं कृत्वा) (निरग्निर्वा विधुरो वा कूष्माण्डहोमे उक्तरीत्याऽग्निं संस्थाप्य समिन्धनम्) आहिताग्निश्चेत् अग्नयोः प्रणयनं कृत्वा समिन्धनम्। विच्छिनाश्चेत् पुनराधानं पवमानेष्टयन्तं पूर्णाहुत्यन्तं वा कृत्वा समिन्धनम् । अस्तात्पूर्वं ब्रह्मान्वा-धानं कुर्यात्। तद्यथा- संन्यासं कर्तुं ब्रह्मान्वाधानं करिष्ये इति संकल्प्य अग्निध्यानं कृत्वा आज्यं संस्कृत्य स्रुक्स्रुवौ संमार्ज्य स्रुचि चतुराज्यं गृहीत्वा ॐ स्वाहा इति हुत्वा परमात्मान इदं न मम। परिषेचनादि ॥

आहिताग्निश्चेत् आहवनीये जुहुयात् ॥ ततः सायंसन्ध्या- औपासनं / अग्निहोत्रहोमं वैश्वदेवं च कृत्वा अग्निसमीपे जागरं कुर्यात् ब्रह्मचारी विधुरस्य होमवैश्वदेवौ न स्तः ॥

प्रातर्नित्यहोमान्ते आग्नेय्यं वैश्वानरं वा स्थालीपाकं कुर्यात्। करिष्यमाण-संन्यासपूर्वाङ्गभूतम् आग्नेय्यं / विश्वानरीयस्थालीपाकं करिष्ये इति संकल्प्य निर्वापादि समानं नाम्नैव प्रधानहोमः ॥

अथाहिताग्निः - अग्निहोत्रहोमान्ते पौर्णमासश्चेत् पौर्णमासेष्टिं कृष्णपक्षस्य अग्निहोत्रमपकर्ष्य पक्षाहुतिं दर्शेष्टिं च कुर्यात्। दर्शश्चेत् केवलां दर्शेष्टिम् एव कुर्यात्। ततः देशकालौ संकीर्त्य संन्यासपूर्वाङ्गतया प्राजापत्येष्ट्या वैश्वानरेष्ट्या च समानतन्त्रेण यक्षे इति संकल्पः।

अन्वाधानादिपौर्णमासतन्त्रं वैश्वानरो द्वादशकपालः प्राजापत्यः चरुः, वैष्णवो नवकपालः अथवा केवलप्राजापत्येष्टिर्वा आपस्तम्बमते। बौधायनकात्यायनादीनां केवल वैश्वानरेष्टिः केवलप्राजापत्येष्टिः भवति। प्रयोगः स्वसूत्रानुसारेण ऊह्यः॥

पञ्चदशसामिधेन्यः अन्वाधानादि व्रत प्रवेशानन्तरं अध्वर्युः आज्यं संस्कृत्य स्रुचिचतुर्गृहीतं गृहीत्वा पृथिवीति चतुहोतृ -होमं जुहुयात्। पृथिवी होता। द्यौरध्वर्युः। त्वष्टाऽग्रीत्। मित्र उपवक्ता स्वाहा।

अथ सारस्वतहोमौ

प्रत्येकं चतुर्गृहीतं द्वे आहुती -

१) पूर्णा पश्चादुत पूर्णा पुरस्तादुन्मध्यत पौर्णमासी जिगाय।
तस्यां देवा अधिसंवसन्त उत्तमे नाक इह मादयन्ता२स्वाहा॥

२) यत्ते देवा अदधुर्भागधेयममावास्ये संवसन्तो महित्वा।
सानौ यज्ञं पिपृहिविश्ववारे रयिन्नो धेहि सुभगे सुवीर२ स्वाहा॥

अथ निर्वापादिकर्म प्रतिपद्यते - आज्यभागान्तं कृत्वा

अग्नेर्वैश्वानरस्य पुरोनुवाक्या -

वैश्वानराय प्रतिवेदयामा यदीनृणं संगरो देवतासु।
स एतान्याशा आशान्प्रमुचनान्प्रवेद स नो मुञ्चतु दुरितादवद्यात्॥

याज्या -

वैश्वानरः पवयान्नः पवित्रैर्यत्संगरमभिधावाम्याशाम्।
अनाजानन्मनसा याचमानो यदत्रैनो अव तत्सुवामि॥

अग्नये वैश्वानरायेदं न मम। अग्नेर्वैश्वानरस्यांहं देवयज्ययान्नादो भूयासम्। अनिरुक्तं प्राजापत्यम् - प्रजापतेः -

अनुवाक्या -

सुभूरसि श्रेष्ठो रश्मीनामायुर्धा अस्यायुर्मे धेहि वर्चोधा असि वर्चो मे धेहि।

स्वयंभु ब्रह्म परमं तपो यत्स एव पुत्रः स पुत्रः स पिता स माता तपो ह यक्षं प्रथमꣳ सम्बभूव॥

याज्या -

प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव।

यत्कामास्ते जुहुमस्तन्नो अस्तु वयंꣳ स्याम पतयो रयीणाम्॥

प्रजापतय इदं नमम॥

प्रजापतेरहंदेवयज्ययऽविधूतपाम्पा प्रतिष्ठां गमेयम्।

विष्णुपक्षे पुरोनुवाक्या -

वषट्ते विष्णवास आकृणोमि तन्मे जुषस्व शिपिविष्टहव्यम्।

वर्धन्तु त्वा सुष्टुतयो गिरो मे यूयं पात स्वस्तिभिःसदा नः।

याज्या -

प्रतत्ते अद्य शिपिविष्ट नामार्यः शंसामि वयुनानि विद्वान्।

तं त्वा गृणामि तवसमतव्यान्क्षयन्तमस्य रजसः पराके॥

विष्णव इदं न मम। दब्धिरस्यदब्धो भूयासं पाप्मानं दभेयम्॥

अथ स्रुवेणोपहोमाः आहवनीये गार्हपत्ये च क्रमेण जुहुयात् -

१) वैश्वानरोन ऊत्या प्रयातु परावतः। अग्निरुक्थ्यन वाहसा स्वाहा॥

वैश्वानरायेदं न मम इति सर्वत्र त्यागः।

२) ऋतावानं वैश्वानरमृतस्य ज्योतिष्पतिम्। अजस्रं घर्ममीमहे स्वाहा॥

३) वैश्वानरस्य दꣳसनाभ्यो बृहदरिणादेकः स्वपत्स्यया कविः।

उभा पितरा महयन्नजायताग्निर्द्यावापृथिवी भूरि रेतसा स्वाहा॥

४) पृष्टो दिवि पृष्टो अग्निः पृथिव्यां पृष्टो विश्वा ओषधीरा विवेश।

वैश्वानरः सहसा पृष्टो अग्निः सनोदिवा स रिषः पातु नक्तꣳ स्वाहा॥

५) जातो यदग्ने भुवनाव्यख्यः पशुं न गोपा इर्यः परिज्मा ।
वैश्वानरब्रह्मणेविन्द गातुं यूयं पात स्वस्तिभिः सदा नः स्वाहा ॥

६) त्वमग्ने शोचिषा शोशुजना आरोदसी अपृणा जायमानः ।
त्वं देवाऽअभिशस्तेरमुञ्चो वैश्वानर जातवेदो महित्वा स्वाहा ॥

७) अस्माकमग्ने मघवत्सु धारयानामिक्षत्रमजरꣳसुवीर्यम् ।
वयं जयेम शतिनꣳसहस्रिणं वैश्वानरवाजमग्ने तवोतिभिः स्वाहा ॥

८) वैश्वानरस्य सुमतौ स्याम राजाहिकं भुवनानामभिश्रीः ।
इतो जातो विश्वमिदं वि चष्टे वैश्वानरो यतते सूर्येण स्वाहा ॥

अथैनमुपतिष्ठेत "सहस्रशीर्ष" इति सूक्तेन । ततः स्विष्टकृतादिशेषं समापयेत् । यजमानभागप्राशनकाले दर्भस्तम्भस्थयजमानभागात् किंचित् गृहीत्वा -

आर्युदा अग्ने हविषो जुषाणो घृतप्रतिको घृतयोनिरेधि ।
घृतं पीत्वा मधुचारुगव्यं पितेव पुत्रमभिरक्षतादिमम् ॥

इति आदाय सहस्रशीर्षेत्यनुवाकेन प्राश्याचम्य 'ओमितिब्रह्म । ओमितीदꣳसर्वम्' इत्यनुवाकेन शेषमाहवनीये प्रक्षिपेत् ।

ओमिति ब्रह्म । ओमितीदꣳसर्वम् । ओमित्येदनुकृति ह स्म वा अप्योश्रावयेत्याश्रावयन्ति । ओमिति सामानि गायन्ति । ओꣳशोमितिं शस्त्राणिं शꣳसन्ति । ओमित्यध्वर्युः प्रतिगरं प्रतिगृणाति । ओमिति ब्रह्मा प्रसौति । ओमित्यग्निहोत्रमनुजानाति । ओमितिं ब्राह्मणः प्रवक्ष्यन्नाह ब्रह्मोपाप्नवानीतिं । ब्रह्मैवोपाप्नोति ॥ इति प्रक्षिपेत् ॥

अग्ने व्रतपतयेत्यादि व्रतविसर्जनानन्तरं -

सर्वो वै रुद्रस्तस्मै रुद्राय नमो अस्तु । पुरुषो वै रुद्रःसन्महे नमो नमः ॥ विश्वभूतं भुवन चित्रं बहुधाजातं जायमानं च यत् । स वो ह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु ॥ इति द्वाभ्यामग्निमुत्सृजेत् । एवं वैश्वानराद्यन्यतमां इष्टिं कृत्वा सर्वाधाने दक्षिणाग्नौ प्राणादिहोमं पुरुषसूक्तहोमं विरजाहोमं च कुर्यात् ॥

ब्राह्मणतर्पणानन्तरं प्रथमतः आत्मनि अग्निमाहवनीयं समारोप्य तस्मिन्

अग्नौ अरणिमुसलोलूखलातिरिक्तनि अन्यानि दारुपात्राणि सर्वाणि प्रक्षिपेत्। अनन्तरं गार्हपत्ये अरणिद्वयं प्रक्षिप्य आत्मनि अग्निं समारोपयेत्। ततः दक्षिणाग्नौ मुसलोलुखले प्रक्षिप्य अग्निमपि विरजाहोमान्ते आत्मनि समारोपयेत्। ततः औपासनाग्नेः समारोपः। समारोपमन्त्रौ - अग्रे वक्ष्येते॥

॥ अथ विरजाहोमः ॥

ततः तरत्समन्दीति जपित्वा कुशहेमरूप्य जलैः स्नात्वा देशकालौ स्मृत्वा सन्यासाङ्गभूतं प्राणादिहोमं पुरुषसूक्तहोमं विरजाहोमं च करिष्ये इति संकल्प्य अन्वाधाने आज्येनेत्यंते प्राणादि पंच देवताः समिच्चर्वाज्यैः पुरुषसूक्तेन प्रत्यृचं षोडशवारं समिच्चर्वाज्यैः प्राणादि पञ्चविंशतिदेवता विरजामन्त्रैः प्रतिद्रव्यं एकैकया संख्यया समिच्चिर्वाज्याहुतिभिः प्रजापतिं सकृदाज्येन शेषेण स्विष्टकृत् इत्यादिविरजाहोमादौ पात्रासादनकाले अग्नेरुत्तरतः प्रात्रासादनम्। अग्नेर्दक्षिणतः पूर्वगृहीतान् दण्डकमण्डलू-कौपीनाच्छादने शिक्यापात्रादीनासादयते।

आहिताग्नेस्तु दक्षिणाग्नेः उदक्पश्चात् पात्रासादनम्। दक्षिणाग्नेरग्रे आहवनीयाद्दक्षिणतः दण्डकमण्डल्वादीनाम् आसादनं कुर्यात्॥

षष्ट्युत्तरशतवारं तूष्णीं निरूप्य प्रोक्ष्य श्रपयित्वा आज्यभागान्तं कृत्वा - अवदानधर्मेण द्रव्यत्रयमवदाय प्राणायस्वाहेत्यादि पञ्चमन्त्रैः सकृत् हुत्वा यथादैवतं त्यागं वदेत्। एवमेव सहस्रशीर्षेति षोडशमन्त्रैः प्रत्येकं हुत्वा पुरुषायेदं न ममेति त्यागः॥

वि. सू. तैत्तिरीये आरण्यके त्रिषष्ठितमानुवाकतः षट्षष्ट्यनुवाकपर्यन्तं पञ्चविंशतिमन्त्राः विरजाहोमार्थम् आम्नाताः सन्ति। धर्मसिन्धौ तु आदिमान् षण्मन्त्रान् विहाय प्राणापानेत्यादि एकोननवतिमन्त्राः प्रदर्शिताःसन्ति। तत्र प्रमाणं न कथितमस्ति।

टिप्पण्यां शिवगीताश्लोक एक उद्धृतः -

जुहुयात् विरजामन्त्रैः प्राणापानादिभिस्ततः ।
अनुवाकान्तमेकाग्रः समिदाज्य चरून् पृथक् ॥
आत्मन्यग्नीन् समारोप्य याते अग्नेति मन्त्रतः ।
भस्मादायाग्निरित्याद्यैर्विमृज्यांगानि संस्पृशेत् ॥
पापैर्विमुच्यते सत्यं मुच्यते नात्र संशयः ॥ इति ॥

अत्र प्राणापानादिभिः इति पदेन प्राणापानादि पञ्चाहुतीर्ग्राह्याः । प्राणापानादिपदस्य ततः शब्देनान्वयात् । अत्रत्यादिशब्देन पुरुषसूक्तहोमो ग्राह्यः । विरजामन्त्रैः इतीत्यस्य अनुवाकान्तं इति पदेनान्वयो भवेत् । अदिमानुवाकद्वयस्य परित्यागे मानाभावात् आम्नाय वैय्यर्थ्याच्च ॥ एवं चेत् निर्वापकाले चतुर्विंशतिमुष्टीनां निर्वापोऽधिको भवेत् । आहत्य चतुरशीत्युत्तर शतं - १८४ - मुष्टीनां निवार्पः कार्यः ॥

प्रतिद्रव्यं मन्त्रावृत्तिः अवदानधर्मेण सकृद्वा । प्राणादिहोमपुरुषसूक्तहोमान्ते विरजाहोमः ॥

अथ विरजाहोममन्त्राः

१) तिलान्जुहोमि सरसाꣳसपिष्टान् गन्धार ममचित्ते रंमन्तु स्वाहा । परमात्मन इदं न मम ॥ इति सर्वत्र त्यागमन्त्रः॥

२) गावो हिरण्यं धनमन्नपानं सर्वेषां श्रियै स्वाहा ॥

३) श्रियं च लक्ष्मीं च पुष्टिं च कीर्तिं चानृण्यताम् । ब्रह्मण्यं बंहु पुत्रताम् । श्रध्दामेधे प्रजाः संदक्षंतु स्वाहा ॥

४) तिलाः कृष्णास्तिलाःश्वेतास्तिला सौम्या वंशानुगाः । तिलाः पुनन्तुं मे पापं यत्किंदुरितं मंयि स्वाहा ॥

५) चोरस्यान्नं नंवश्राध्दं ब्रह्महा गुंरुतल्पगः । गोऽस्तेयꣳसुरापानं भ्रूणहत्या तिला शान्तिꣳशमयन्तु स्वाहा ॥

६) श्रीश्च लक्ष्मीश्च पुष्टीश्च कीर्तिंचानृण्यताम् । ब्रह्मण्यं बंहुपुत्रताम् ।

श्रध्दामेधे प्रज्ञा तु जातवेदः सं ददातु स्वाहा ॥

७) प्राणापानव्यानोदानसमाना में शुध्यन्ताम् ज्योतिरहं विरजा विपाप्मा भूयासꣳस्वाहा ॥

८) बाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्राणरेतो बुध्याकूतिः संकल्पा में शुध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासꣳस्वाहा ॥

९) त्वक्चर्ममाꣳसरुधिरमेदोमज्जास्नायवोस्थिनि में शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासꣳस्वाहा ॥

१०) शिरःपाणिपादपार्श्वपृष्ठोदरजङ्घशिश्नोपस्थपायवो में शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासꣳस्वाहा ॥

११) उत्तिष्ठ पुरुष हरे लोहितपिङ्गलाक्षि देहि देहि ददापयिता में शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासꣳस्वाहा ॥

१२) पृथिव्यप्तेजोवाय्वाकाशा मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासꣳस्वाहा ॥

१३) शब्दस्पर्शरूपरसगन्धा में शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासꣳस्वाहा ॥

१४) मनोवाक्कायकर्माणि में शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासꣳस्वाहा ॥

१५) अव्यक्त भावैरहंकारैर्ज्योतिरहं विरजा विपाप्मा भूयासꣳस्वाहा ॥

१६) आत्मा में शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासꣳस्वाहा ॥

१७) अन्तरात्मा में शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासꣳस्वाहा ॥

१८) परमात्मा में शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासꣳस्वाहा ॥

१९) क्षुधे स्वाहा। २०) क्षुत्पिपासाय स्वाहा।

२१) विविंट्टि स्वाहा ॥ २२) ऋग्विधानाय स्वाहा।

२३) घषौत्काय स्वाहा ॥

२४) क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीर्नाशयाम्यहम्। अभूतिमसमृध्दिंच

सर्वान्निर्णुद मे पाप्मानꣳस्वाहा ॥

२५) अन्नमय प्राणमयमनोमयविज्ञानमयमानन्दमयमात्मा मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासꣳस्वाहा ॥

इत्यन्तं समिच्चर्वाज्यै र्हुत्वा -

यदिष्टं यच्चापूर्तं यद्यापद्यनापदि प्रजापतौ तन्मनसि जुहोमि विमुक्तोहं देवकिल्बिषात्स्वाहा । इति केवलाज्यं जुहुयात् । प्रजापतय इदं न मम इति त्यागः ॥

ततः अग्निमीळेत्यादि चतुर्वेदादिऋक्चतुष्टयं जपित्वा स्विष्टकृदादि होमशेषं समाप्य ब्रह्माऽऽचार्यादिभ्यो गोहिरण्यवस्त्रादि दत्वा अग्निमुपस्थाय तत्राग्नौदारुपात्राणि दहेत् । तैजसानि गुरवेदद्यात् । ततः आत्मनि अग्निं समारोपयेत् 'अयन्ते योनिः'इति 'या ते अग्ने यज्ञिया तनूः' इति च यजुषा -

अयन्तेयोनिर्ऋत्वियो यतो जातो अरोंचथाः ।
तं जानन्नग्न आसीदा नो वर्धया गिरः ॥
या तें अग्ने यज्ञियास्तनूस्तयेह्यारोह्यात्मात्मानमच्छावसूनि कृण्वन्नस्मे नर्यो पुरुणि ।
यज्ञो भूत्वा यज्ञमासीद स्वां योनिं जातवेदो भुव अजायमानः सक्षय एहि । इतिहस्तं प्रताप्य मुखायाहरति ॥

अग्नेः अग्नीनां वा समारोपानन्तरं कृष्णजिनमादाय ग्रहान्निष्क्रम्य -

सर्वे भवन्तु वेदाढ्याः सर्वे भवन्तु सोमपाः ।
सर्वे पुत्रमुखं दृष्ट्वा सर्वे भवन्तु भिक्षुकाः ॥

इति पुत्रादिभ्यो आशिषो दत्वा - " न मे कश्चिन्नाहं कस्यचित् " इत्युक्त्वा पुत्रादीन् विसृजेत् ॥

अतः परं सर्वेषां समानः । विधुरसाग्निकानग्निकाहिताग्नीनां विशेष उक्तः । ब्रह्मचारिणां अग्रे वक्ष्यते । ततः जलाशयं गच्छेत् ॥ जलाशयं गत्वा अञ्जलिना जलमादाय आशुःशिशान इति सूक्तेन अभिमन्त्र्य " सर्वाभ्यो देवताभ्यः स्वाहा " इतित्यजेत् ।

आशुः शिशानो वृषभो न भीमो धनाघनः क्षोभणश्चर्षणीनाम्। संक्रन्दनोऽनिमिष एक वीरः शतं सेना अजयत्साकमिन्द्रः ॥

संक्रन्दनेनानिमिषेण जिष्णुना युत्कारेण दुश्चवनेन धृष्णुना। तदिन्द्रेण जयत तत्सहध्वं युधा नर इषुहस्तेन वृष्णा ॥

स इषुहस्तैः स निषंगिभिर्वशी संस्रष्टा स युध इन्द्रो गणेन। संसृष्टजित्सोमपा बाहुशर्ध्युग्रधन्वा प्रतिहिताभिरस्ता ॥

बृहस्पते परिदीया रथेन रक्षोहामित्राँ अपबाधमानः। प्रभञ्जन्सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानाम् ॥

बलविज्ञायः स्थविरः प्रवीरः सहस्वान्वाजी सहमान उग्रः। अभि वीरो अभिसत्वासहोजा जैत्रमिन्द्र रथमातिष्ठ गोवित् ॥

गोत्रभिदं गोविदं वज्रबाहुं जयन्तमज्म प्रमृणन्तमोजसा। इमं सजाता अनु वीरयध्वमिन्द्रं सखायो अनु संरभध्वम् ॥

अभि गोत्राणि सहसा गाहमानो दयो वीरः शतमन्युरिन्द्रः। दुश्च्यवनः पृतनाषाळयुध्योऽस्माकं सेना अवतु प्रयुत्सु ॥

इन्द्रं आसां नेता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः। देवसेनानामभिभंजतीनां जयन्तीनां मरुतोयंत्वग्रम् ॥

इन्द्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां मरुतां शर्ध उग्रम्। महामनसां भुवनच्यवानां घोषो देवानां यजतामुदस्थात् ॥

उद्धर्षय मघवन्नायुधान्युत्सत्वनां मामकानां मनांसि। उद्धृत्रहन्वाजिनां वाजिनान्युद्रथानां जयतां यन्तु घोषाः ॥

अस्माकमिन्द्रः समृतेषु ध्वजेष्वस्माकं या इषवस्ता जयन्तु। अस्माकं वीरा उत्तरे भवन्त्वस्माँ उ देवा अवताहवेषु ॥

अमीषां चित्तं प्रतिलोभयन्ती गृहाणांगान्यप्वे परेहि। अभिप्रेहि निर्दह हृत्सुशोकैरन्धेना मित्रास्तमसा स चन्ताम् ॥

प्रेता जयता नर इन्द्रो वः शर्म यच्छतु। उग्रा वः सन्तु बाहवोऽना धृष्या

यथासंथ ।।

अथ सर्वत्यागविधिः - तिथ्यादि स्मृत्वा अपरोक्षब्रह्मावाप्तये संन्यासं करोमि इति संकल्प्य जलाञ्जलिं गृहीत्वा -

ॐ एष ह्वा अग्निः सूर्यः प्राणं गच्छ स्वाहा ।। ॐ स्वां योनिं गच्छ स्वाहा ।। ॐ आपो वै गच्छ स्वाहा ।। इति मन्त्रेण जलेषु अंजलित्रयं दद्यात् । पुत्रेषणा वित्तेषणा लोकेषणा सर्वेषणा मया परित्यक्ता । अभयं सर्वभूतेभ्यः मत्तः स्वाहा इति अञ्जलिजलं जले क्षिपेत् ।।

अत्र कपिलः -

विधिप्रेषमुक्त्वाथ त्रिरुपांशु त्रिरुच्चकैः ।
अभयं सर्वभूतेभ्यो मत्तस्वाहेत्यपिभुवि ।
निनीय, दण्डशिक्यादि गृहीत्वाथ बहिर्व्रजेत् ।।

अत्रैव मनुः -

यो दत्वा सर्वभूतेभ्यः प्रव्रजत्यभयं गृहात् ।
तस्य तेजोमयालोका भवन्ति ब्रह्मवादिनः ।। इति

पुनरेवं अभयं दत्वा वदेत् -

धर्मसिन्धुकारः -

यत्किंचिब्दन्धसंकर्म कृतमज्ञानतो मया ।
प्रमादालस्यदोषोत्थं तत्सर्वंसत्यजाम्यहम् ।।
त्यक्तःसर्वोविशुध्दात्मा गतस्नेह शुभाशुभः ।
एष त्यजाम्यहं सर्वं कामभोगसुखादिकम् ।।
रोषं तोषं विवादं च गन्धमाल्यानुलेपनम् ।
भूषणं नर्तनं गेयं दानमादानमेवच ।।
नमस्कारं जपं होमं याश्च नित्याः क्रिया मम ।
नित्यं नैमित्तिकं काम्यं वर्णधर्माश्रमाश्च ये ।
सर्वमेवपरित्यज्य ददाम्यभयदक्षिणाम् ।।

पद्भ्यां कराभ्यां विहरन्नाहं वाक्काय मानसै : ।
करिष्ये प्राणिनां पीडां प्राणिनः सन्तु निर्भयाः ॥

ततः सूर्यादिदेवान् साक्षित्वेन ध्यात्वा नाभिमात्रे जले प्राङ्मुखः सावित्री प्रवेशं पूर्ववत्कृत्वा तरत्समन्दीति सूक्तं पठित्वा -

तरत्समन्दीधावति धारा सुतस्यान्धसः । तरत्समन्दी धावति ॥ उस्रावेदवसूनां मर्तस्य देव्यावसः । तरत्समन्दी धावति ॥ ध्वस्रयोःपुरुषं त्योरासहस्राणि दद्महे । तरत्समन्दी धावति ॥ आययोस्त्रिंशतन्तना सहस्राणि च दद्महे । तरत्समन्दीधावति । पुत्रेषणाया वित्तेषणाया लोकेषणायाश्च व्युत्थितोऽहं भिक्षाचर्यां चरामि इति जलं जले जुहुयात् ॥

अथ प्रैषोच्चारविधिः - ॐ भूः सन्यस्तं मया, ॐभुवः सन्यस्तं मया , ॐ स्वः सन्यस्तं मया, ॐभूर्भुवः स्वः सन्यस्तं मया इति त्रिः मन्द्र-मध्य-उच्चस्वरेण उक्त्वा अभयं सर्व भूतेभ्यो मत्तः स्वाहा इति जलं जले क्षिपेत् । ततः शिखाम् उत्पाट्य यज्ञोपवीतमुध्दत्य करे गृहीत्वा - " आपो वै सर्वा देवताः सर्वाभ्यो देवताभ्यो जुहोमि स्वाहा । ॐ भूः स्वाहा " इति जलैः सह जले हुत्वा प्रार्थयेत् -

त्राहिमां सर्वलोकेश वासुदेव सनातन ।
सन्यस्तं मे जगद्योने पुण्डरीकाक्ष मोक्षद ।
युष्मच्छरणमापन्नं त्राहिमां पुरुषोत्तम ॥ इति ॥

ततः दिगम्बरः पञ्चपदानि उदङ्मुखो गच्छेत् । विविदिषुश्चेत् - तस्मै आचार्यो नत्वा काषाय-कौपीनाच्छादने दत्वा दण्डं दद्यात् । स च कौपीनं वासश्च परिधाय " ओं इन्द्रस्य वज्रोऽसि सखे मां गोपाय " इति दण्डं गृह्णीयात् । " वार्त्रघ्नःशर्ममे भव । यत्पापं तन्निवारय । " इति दण्डं प्रार्थ्य - प्रणवेन गायत्र्या वा कमण्डलुं - इदं विष्णुरित्यृचा आसनं स्वयं स्वीकुर्यात् ॥

अथ वाक्योपदेशः - ततः समित्पाणिः गुरुं नत्वा गरुडासने उपविष्टःसन् गुरुं वदेत् -

त्रायस्व भो जगन्नाथ गुरो संसारवह्निना ।
दग्धं मां कालदष्टं च त्वामहं शरणागतः ॥

यो ब्रह्माणं विदधाति पूर्वं यो वेदांश्च प्रहिणोति तस्मै ।
तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये ॥

इति गुरुमुपस्थाय दक्षिणं जान्वाच्य पादावुपसंगृह्य - अधीहि भगवो ब्रह्म - इति वदेत्। अथ गुरुः - आत्मानं ब्रह्मरूपं ध्यात्वा जलपूर्णं शंखं द्वादशप्रणवैः अभिमन्त्र्य तेन शिष्यम् अभिषिच्य शन्नोमित्र इति शान्तिं पठित्वा - शन्नो मित्रः शं वरुणः। शंन्नो भव त्वर्यमा। शन्न इन्द्रो बृहस्पतिः। शन्नो विष्णुरुरुक्रमः। नमो ब्रह्मणे। नमस्ते वायो। त्वमेव प्रत्यक्षं ब्रह्मासि। त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि। ऋतं वदिष्यामि। सत्यं वदिष्यामि। तन्मामवतु। तद्वक्तारं मवतु। अवतु माम्। अवतु वक्तारम्। ॐ शान्तिः शान्तिः शान्तिः ॥

तच्छिरसि हस्तं दत्वा पुरुषसूक्तं जपित्वा शिष्यहृदये हस्तं कृत्वा - " मम व्रते हृदयं ते दधामि मम चित्तमनु चित्तं ते अस्तु। मम वाचमेक व्रतो जुषस्व बृहस्पति स्त्वा नियुनक्ति मह्यम्। इति जप्त्वा - दक्षिणकर्णे ' प्रणवम् ' उपदिष्य तदर्थं पञ्चीकरणादि अवबोध्य, प्रज्ञानं ब्रह्म। अयमात्मा ब्रह्म। तत्वमसि। अहं ब्रह्मास्मि। इति ऋग्वेदादि महावाक्येषु अन्यतमं शिष्यशाखानुसारेण उपदिष्य तदर्थं बोधयेत्। ततः - तीर्थाश्रमादिसम्प्रदायानुसारेण नाम दद्यात्।

अथ पर्यङ्कशौचविधिः - कश्चिद् गृहस्थः पर्यंकशौचं कुर्यात् स्वाग्रे पीठादौ यतिम् उपावेष्य गुर्वनुज्ञातः " यतये पर्यंक शौचं करिष्ये इति संकल्प्य वामदक्षिण भागयोः पञ्च-पञ्च मृत् भागान् संस्थाप्य उभयत्र शुद्धोदकं च संस्थाप्य वामप्रथमभागेन मृज्जलाभ्यां यति जानुद्वयं स्वकराभ्यां युगपत् क्षालयेत्। एवं चतुर्वारं क्षालयित्वा पञ्चमवारक्षालने वामप्रथमभागस्य मृत्समापयेत्। एवमग्रेपि ततः दक्षिणभागस्थं प्रथमस्य भागार्धं मृत् गृहीत्वा स्व वामकरं मृज्जलाभ्यां दशवारं प्रक्षाल्य शिष्टार्धेन करौ सप्तवारं क्षालयेत्। वाम द्वितीय भागेन चतुर्वारं यति जंघाद्वयं युगपत् प्रक्षाल्य दक्षिणद्वितीय भागार्धेन सप्तवारं स्व वामकरं शिष्ठोर्धेन करौ चतुर्वारं प्रक्षालयेत्। वाम तृतीयेन यति गुल्फौ त्रिवारं प्रक्षालयेत्। दक्षिणभागार्धेन स्व वामकरं षड्वारं शिष्टार्धेन करौ चतुर्वारं

प्रक्षालयेत् । दक्षिण चतुर्थ भागेन यतिपादपृष्ठौ द्विवारं प्रक्षाल्य दक्षिणभागस्यार्धेन स्ववामकरं चतुर्वारं, करौ द्विवारं शिष्ठोर्धेन प्रक्षालयेत् । वामपञ्चमेन यति पादतले सकृत्प्रक्षाल्य दक्षिणपञ्चमभागार्धेन स्ववामकरं द्विवारं शष्ठार्धेन करौ सकृत् प्रक्षालयेत् । इति पर्यंक शौचः ।

अथ योगपट्टः - कारितपर्यंकशौचो यतिः स्वयं कटिशौचं कृत्वा कटिसूत्रकौपीने धृत्वा वस्त्रेणावगुण्ठ्य गुर्बनुज्ञया उच्चासने उपविष्य सभ्यैः सह वेदान्ते किंचिदुपन्यसेत् -

गुरुः यतिः, शिष्यं यतिं शिरसि शंखेन पुरुषसूक्तेन अभिषिच्य वस्त्रगन्धपुष्पधूपनैवेद्यैः सम्पूज्य वस्त्रमुपरि धृत्वा यतिभिः सह विश्वरूपाध्यायं " पश्यामि देवान् इत्यारभ्य भुङ्क्ष्वराज्यं समृध्दम् " इत्यन्तं पठित्वा पूर्वकल्पितं नाम दद्यात् । ततः शिष्यं वदेत् - इतः परं त्वया सन्यासाधिकारिणे सन्यासो देयः । दीक्षायोगपट्टादिकं च कार्यम् । ज्येष्ठयतयो नमस्कार्याः । इति उपदिष्य गुरुर्यतिः शिष्ययतिने पञ्चमुद्रलंकृतं पूर्वसंस्कृतं दण्डं दत्वा यथासम्प्रदायं नमस्कुर्यात् । अन्ये यतयः, गृहिणः च नमस्कुर्युः । शिष्ययतिः " नारायण " इत्युक्त्वा आसनात् उत्थाय तत्र गुरुम् उपावेष्य यथाविधि नत्वा अन्ययतीन् नमेत् ॥इति अग्निमतो विधुरादेश्च विविदिषा सन्यासप्रयोगः ॥

अथ ब्रह्मचारी स्नातकानां प्रति तु ब्रह्मान्वाधान विरजाहोमादि अग्निसम्बन्धि कर्म रहितः प्रयोगः । स्वाग्न्यभावात् ॥

आतुरस्य तु सन्यासे - संकल्प-प्रैषोच्चारण-अभयदानं चेति त्रयम् अवश्यं कार्यम् । अष्टश्राध्दादि दण्डग्रहणान्तं यथासम्भवं कार्यम् ॥

तत्प्रयोगः

मन्त्रस्नानं कृत्वा शुध्दवस्त्रं धृत्वा ' ज्ञानप्राप्तिद्वारा मोक्षसिध्यर्थं आतुरविधिना सन्यासमहं करिष्ये ' इति संकल्प्य पञ्चशिखाकेशानवशिष्य वपनं कृत्वा स्नात्वा सन्ध्योपासनहोमान्तं यथा सम्भवं सम्पाद्य आत्मनि समारोपं कुर्यात् । अग्निहोत्री तु प्राजापत्यादिस्थाने पूर्णाहुतिं कृत्वा श्रौताग्निम् आत्मनि सामारोपयेत् । उच्छिन्नाग्रीनां पुनराधानसम्भवे समारोपः अन्यथा न समारोपः । अन्यत्सर्वं यथासम्भवं कार्यम् ।

अत्र जाबालिश्रुतिः -

आतुराणां च संन्यासे न विधिर्नैव च क्रिया।
प्रैषमात्रं च संन्यासं आतुराणां विधीयते॥
उत्पन्ने संकटे घोरे चौरव्याघ्रादि गोचरे।
भवभीतस्य संन्यासं अंगिरामनुरब्रवीत्॥
यद्यातुरस्यान्मनसा वाचा वा संन्यसेद्विजाः।
संन्यस्तोऽहमिति ब्रूयात् सवनेषु त्रिषु क्रमात्॥
त्रिवारं च त्रिलोकात्मा शुभाशुभसुधाद्रवे।
यत्किञ्च बाधकं कर्म कृतमज्ञानतोमया॥
प्रमादालस्यदोषाद्यत् तत्तसन्त्यक्तवानहम्।
एवं सन्त्यज्य भूतेभ्यो दद्यादभयदक्षिणाम्॥
पद्माभ्यां कराभ्यां विहरन् नाहं वाक्कायमानसै:।
करिष्ये प्रणिनां हिंसा प्राणिनसन्तु निर्भयाः॥ इति॥

विष्णुस्मृतौ -

सन्यस्तमिति यो ब्रूयात् प्राणैः कण्ठगतैरपि।
न तत्क्रतुशतैः पुण्यं प्राप्तुं शक्नोति मानवः॥

अथाङ्गिराः -

षष्टिः कुलान्यतीतानि षष्टीनामधिकानि च।
कुलान्युध्दरते प्रज्ञा सन्यस्त मिति यो वदेत्॥ इति॥

अथ यतिधर्माः

प्रातरुत्थाय ब्रह्मणस्पते इति ऋचं जपित्वा दण्डादीनि मृदंचादाय मूत्रपुरीषयोः गृहस्थचर्तुगुणं शौचं कृत्वा आचम्य पर्वद्वादशी वर्ज्यं प्रणवेन दन्तधावनं कृत्वा मृदा बहिः कटिं प्रक्षाल्य जलतर्पण वर्ज्यं स्नात्वा पुनर्जघे प्रक्षाल्य वस्त्रादीनि धृत्वा प्रणवेन प्राणायाममार्जनादि कृत्वा केशवादिनमोन्तनामभिः तर्पयित्वा "भूस्तर्पयामि"

इत्यादि व्यस्तसमस्त व्याहृतिभिस्तर्पयित्वा महरादि सत्यन्तमेवमेव तर्पयेत्। सावित्र्या सूर्योपासना, प्रणवेन त्रिकालं विष्णु-उपासना च प्रतिदिनं कार्यम् ॥

अत्र वासिष्ठोक्तप्राणायामविधिः

व्याहृतिं सप्रणवां गायत्रीं शिरसा सह। त्रिःपठेदायतप्राणः प्राणायामः स उच्यते। नासिकाकृष्ठ उच्छ्वासो ध्यतः पूरकउच्यते। कुम्भको निश्चलश्वासो मुच्यमानस्तुरेचकः। दह्यन्ते ध्यायमानानां धातूनां हि यथा मलाः। तथेद्रियाणां दह्यन्ते दोषाः प्रणस्यनिग्रहात्।

अथ भिक्षाविधिः -

विधूमे सन्नमुसले व्यंगारे भुक्तवज्जने।
कालेऽपराण्हभूयिष्ठेनित्यं भिक्षां यतिश्चरेत्।
सप्तागाराण्यसंकल्पितानिभैक्ष्यं चरेद्यतिः।
अष्टौभिक्षाःसमादाय मुनिः सप्त च पंच च।
अलाभे न विषादोस्याल्लाभे चैव न हर्षयेत्।
प्राणायत्रिकमात्रस्यान्मात्रासंगाद्विनिर्गतः ॥

अत्र धर्मसिन्धौ -

यतिहस्ते जलं दद्यात् भिक्षां दद्यात्पुनर्जलम्। भैक्ष्यं पर्वतमात्रंस्या तज्जलं सागरोपमम्। एवं दण्डं गृहीत्वा सप्त-पञ्चान्यतमगृहेभ्यः भिक्षां याचित्वा अन्नं प्रोक्ष्य "भूःस्वधानमः" इत्यादि व्यस्तसमस्त व्याहृतिभिः भूमौ क्षिप्त्वा शेषमन्नं विष्णुनिवेदितं भुंजीत ॥ भुक्त्वाचम्य षोडष प्राणायामान् कुर्यात् ॥

अन्ये धर्माः -

एकरात्रं वसेद्ग्रामे नगरे पंचरात्रकम्।
वर्षाभ्योऽन्यत्र, वर्षासु मासांश्चतुरो वसेत् ॥
अष्टौमासान् विहारस्यात् यतीनां संयतात्मनाम्।
महाक्षेत्र प्रविष्टानां विहारस्तु न विद्यते ॥
भिक्षाटनं जपः स्नानं ध्यानं शौचं सुरार्चनम्।

कर्तव्यानि षडेतानि सर्वथा नृपदण्डवत् ॥
मञ्चकं शुक्लवस्त्रं च स्त्रीकथा लौल्यमेवच ।
दिवास्वापश्च यानं च यतीनां पतनानि षट् ॥
वृथा जल्पं पात्रलोभं संचयं शिष्यसंग्रहम् ।
हव्यं कव्यं तथान्नं च वर्जयेच्च सदा यतिः ।
यतिपात्राणि मृद्वेणुदार्वलाबुमयानि च ।
नतीर्थ वासी नित्यं स्यान्नोपवासपरो यतिः ।
न चाध्ययनशीलस्यान्नव्याख्यापरोभवेत् ॥
आध्यात्मिकं च सततं वेदान्ताभिहितं च यत् ।
इदं शरणमज्ञानामिदमेव विजानताम् ।
इदमन्विच्छतां स्वर्गमिदमानन्त्यमिच्छताम् ॥
अधियज्ञं ब्रह्म जपेत् । आधिदैविकमेवच ॥
इति संक्षेपतो यतिधर्माः । अन्येऽपि माधवीयमिताक्षरादौ ज्ञेयाः ॥

॥ अथ मृतयतिसंस्कारः ॥

बृहच्छौनकः -

यतिं पुरुषसूक्तेन स्नापयित्वाऽवटं ततः ।
प्रणवेनाष्टवारं तं प्रोक्षयेदथ सर्वतः ॥
विष्णो हव्यं रक्षस्वेति यजुषा प्रणवेन च ।
गर्ते प्रेतं विनिक्षिप्य चेदं विष्णुर्विचक्रमे ॥
इति मन्त्रेण दण्डन्तु दद्याद्दक्षिणहस्तके ।
मूर्धानं भूर्भुवःस्वश्चेति शंखेन भेदयेत्ततः ॥
गर्तं पुरुषसूक्तेन लवणेन प्रपूरयेत् ।
शृगालश्वादिरक्षार्थं सम्यग्गर्तं प्रपूरयेत् ॥

धर्मसिन्धौ -

कुटीचकन्तु प्रदहेत् पूरयेच्च बहूदकम् ।
हंसो जले तु निक्षेप्यः परमहंसः प्रपूरयेत् ॥
एकोदिष्टं जलं पिण्डमाशौचं प्रेतसत्क्रियाम् ।
न कुर्याद्वार्षिकादन्यत् ब्रह्मीभूताय भिक्षवे ॥
त्रिदण्डग्रहणादेव प्रेतत्वं नैव जायते ।
कुटीचकातिरेकेण न दहेद्यतिनं क्वचित् ॥

अथ प्रयोगः - पुत्रः शिष्यो वा स्नात्वा वपनं कृच्छ्त्रयं च अधिकारर्थं कुर्यात् । पुत्रातिरिक्तस्य वपनं कृताकृतम् ।

देशकालौ स्मृत्वा " ब्रह्मीभूतस्य यतेः शौनकोक्तविधिना संस्कारं करिष्ये " इति संकल्प्य नवं कलशं तीर्थेनापूर्य " गंगे च यमुने च ०, नारायणः परं ब्रह्म ० , यच्च किंचिज्जगत्सर्वं ० " इति मन्त्रैः अभिमन्त्र्य रुद्रसूक्त , विष्णुसूक्त, आपोहिष्ठादिभिः यतेः स्नानं विधाय चन्दनादिभिः कलेवरं सम्पूज्य माल्यादिभिः अलंकृत्य वाद्यघोषादिभिः शुध्ददेशं नयेत् । जले स्थले वा पूर्वोक्त रीत्या समाहितं कुर्यात् ।

स्थल पक्षे - व्याहृतिप्रोक्षित भुवि दण्डप्रमाणं गर्तं कृत्वा मध्ये सूक्ष्मगर्तं सार्धहस्तं कृत्वा सप्तव्याहृतिभिः पञ्चगव्येन त्रिःप्रोक्ष्य (जलपक्षे - नद्यां पञ्चगव्यं प्रक्षिप्य) कुशानास्तीर्य सवित्र्या देहं प्रोक्ष्य शंखोदकेन पुरुषसूक्तेन अष्टोत्तरशतावृत्तप्रणवैः च कलेवरं संस्नाप्य अष्टाक्षरेण मन्त्रेण षोडशोपचारैः सम्पूज्य तुलसीमालाद्यलंकृत्य " विष्णो हव्यꣳरक्षस्वेति " मन्त्रेण देहं गर्ते (जले वा) क्षिपेत् । इदं विष्णुरिति मन्त्रेण दण्डं त्रेधाभग्नं दक्षिणहस्ते स्थापयेत् । हंसशुचिसत् ० परेणनाकं निहितं गुहायां ० इतिद्वाभ्यां हृदये जपेत् । पूरुषसूक्तं भ्रुवोर्मध्ये जपेत् । ब्रह्मजज्ञानमिति मन्त्रेण मूर्धनि जपेत् समस्तव्याहृतिमन्त्रेण मूर्धनं शंखेन भेदयत् । न भिन्नश्चेत् - भूमिर्भूमिमगात् माता मातरम्पगात् । भूयास्म पुत्रैः पशुभिः यो नो द्वेष्टि स भिद्यताम् ॥ इति मन्त्रेण परश्वादिना भेदयेत् । गर्तं पुरुषसूक्तेन लवणेन प्रपूरयेत् । शृगालश्वादिरक्षार्थं सिकतादिभिः प्रपूरयेत् ॥

(जले चेत् शिरोभेदनानन्तरं दर्भैराच्छाद्य व्याहृतिभिः अभिमन्त्र्य पाषाणं बध्वा "ॐ स्वाहेति" हृदे न्यसेत्) ततः अग्निनाग्निस्समिध्यते ० त्वं ह्यग्रे अग्निना ० तं मजर्यं त सुक्रतुम् ० यज्ञेन यज्ञमयजन्त देवा ० इति ऋक्चतुष्टयेन चित्तिस्रुग् इत्यादि दशहोत्रसंज्ञकयजुषा च अभिमन्त्रयेत्। अतोदेवेति जपित्वा पापैर्विमुक्त्वा अश्वमेधादि फलभागिनो वयमिति भावयन्तः अवभृतमिति बुध्वा सर्वेऽनुगामिनः स्नात्वा गन्धादि धृत्वा सोत्सवा गृहं गच्छेयुः ॥

ततः कर्ता स्नात्वा आचम्य सिध्दिं गतस्य ब्रह्मीभूतस्य भिक्षोः तृप्त्यर्थं तर्पणं करिष्ये इति संकल्प्य सव्येन देवतीर्थेनैव आत्मानं, अन्तरात्मानं, परमात्मानम् इति चतुश्चतुस्तर्पयित्वा शुक्लपक्षे मृतस्य केशवादिद्वादशनामभिः, कृष्णपक्षे मृतस्य संकषर्णादि-द्वादश नामभिः, द्वितीयान्तेन तर्पणं कुर्यात्। तद्दिने द्वितीये दिने वा देवयजनोपरिनदी-तीरे वा मृन्मयं लिंगं कृत्वा सिद्धिंगतस्य भिक्षोः तृप्त्यर्थं नारायणपूजनं बलिदानं घृतदीपदानं च करिष्ये, इति संकल्प्य पूरुषसूक्तेन अष्टाक्षरमन्त्रेण च षोडषोपचार पूजां कृत्वा घृतमिश्रपायसबलिं दत्वा घृतदीपं च समर्प्य पायसबलिं जले क्षिपेत्। ततः ॐ नमो ब्रह्मणे ॐ ब्रह्मणे नमः इति वा शंखेन अष्टार्घ्यान् दत्वा गृहं व्रजेत्। एवं दशदिनान्तं प्रत्यहं तर्पणं लिंगपूजनं पायसबलिदानं दीपदानं च कुर्यात् ॥

॥ अथैकादशेऽहनि पार्वणश्राद्धम् ॥

तत्रादौ मध्याह्ने नद्यादौ श्राध्दांग तिलतर्पणं कृत्वा ब्रह्मीभूतस्य अस्मत् पितुः/गुरोः करिष्यमाण दर्शादिसर्वश्राध्दाधिकारार्थं अद्यपार्वणं श्राध्दं करिष्ये। गुरोः ब्रह्मीभूतस्य प्रत्यब्दादिश्राध्दाधिकारार्थं तत् पितृसम्बन्धिनामगोत्रोद्देश्यतासिध्यर्थं च पार्वणश्राध्दं करिष्ये। पुत्रश्चेत् - पूरुरवाद्रसंज्ञका विश्वेदेवाः। पितृ-पितामह-प्रपितामहनां नामगोत्रादीनामुच्चारः। सवर्त्र ब्रह्मीतस्येति विशेषणम् ॥

शिष्यश्चेत् - साधुरुरुसंज्ञकविश्वेदेवाः। आत्मा-अन्तरात्मा-परमात्मनामुद्दिष्य नान्दीश्राध्दवत् पार्वणश्राद्धं कुर्यात् ॥

॥ अथैकादशेऽहनि नारायणबलिः ॥

अत्र व्यासोक्तिः -

नारायणं समुद्दिष्य शिवं वा यत्प्रदीयते ।
तस्य शुध्दिकरं कर्म तद्भेवे नैत दन्यथा ॥

छागलोक्तिः -

नारायणबलिः कार्यो लोकगर्हाभयात् नरैः ।
तथा तेषां भवेच्छौचं नान्यथेत्यब्रवीद्यमः ॥

विष्णुपुराणे -

विष्णोरभ्यर्चनं कृत्वा विप्राँस्तानुपवेशयेत् ।
उदन्मुखान् यथाज्येष्ठं पितृरूपमनुस्मरन् ॥
मनोनिवेश्य विष्णौ वै सर्वं कुर्यादतन्द्रितः
आवाहनादियत्प्रोक्तं देवपूर्वं तदाचेरत् । इति ॥

प्रयोगः - सिद्धिंगतस्य भिक्षोः सम्भावितसर्वपापक्षयपूर्वकं विष्णुलोकावाप्तिद्वारा श्री नारायण बलिं करिष्ये । त्रयोदशयतीन् विप्रान्वा निमन्त्र्य शुक्लपक्षेचेत् केशवादि द्वादश नामभिः कृष्णपक्षे संकर्षणादि द्वादश नामभिः केशवरूपिगुर्वर्थे त्वया क्षणः कर्तव्यः इति प्रत्येकं द्वादशभ्यः क्षणं तदा त्रयोदशं विप्रं विष्वर्थे त्वया क्षणः कर्तव्यः इति निमन्त्र्य पादप्रक्षालनान्तं कृत्वा उदङ्मुखान्/प्राङ्गमुखान् वा उपावेशयेत् । विप्राग्रे स्थण्डिले अग्निंप्रतिष्ठाप्य चक्षुषीआज्येनेत्यन्तं कृत्वा अग्निं-वायुं-सूर्यं-प्रजापतिं च व्यस्तसमस्तव्याहृतिभिः प्रत्येकं पायसाहुतिभिः, विष्णुम् अतोदेवा इतिषड्भिः प्रत्यृचं पायासाहुतिभिः, नारायणं पुरुषसूक्तेन प्रत्यृचं षोडषाहुतिभिः पायसद्रव्येण केशवादि/संकर्षणादि निमन्त्रणक्रमेण द्वादशाहुतिभिः पायसद्रव्येण शेषेणेत्यादि निर्वापदि समानम्। क्षीरेश्रपणम् अज्यभागान्ते विष्णुं शालग्रामे पुरुषसूक्तेन अष्टाक्षरेणच शोडषोपचारैः सम्पूज्य अन्वाधानानुक्रमेण प्रधान होमं कुर्यात् । ततः स्विष्टकृतादि प्रायश्चित्तान्तं कृत्वा विष्णुं पूर्ववत् पूजांकृत्वा विष्णुगायत्र्या विष्णवे अर्घ्यं दत्वा हुतशेषेण पायस बलिं दत्वा पूर्णाहुत्यादि होमशेषं समाप्य निमन्त्रण क्रमेण केशवादि नामभिः द्वादशविप्रेभ्यः

इदमासनमित्यादिना आसन-गन्ध-पुष्प-धूप-दीप-आच्छादननानि दत्वा ततः त्रयोदशं विप्रं पुरुषसूक्तेन प्रत्यृचान्ते विष्णवे नमः इत्येवमादिना दीपान्तोपचारैः पूजयेत्।

ततः चतुरस्रमण्डलेषु त्रयोदश भोजन पात्राणि आसाद्य उपस्तरणादि अन्नं परिवेष्य पृथिवीपात्रमित्यादिना त्रयोदशानांविप्राणां केशवादि विष्णवन्तं अन्नं त्यक्त्वा अतोदेवा- ॐ तद्ब्रह्मा, ॐ तद्वायुः , ब्रह्मार्पणम् , इत्याद्यापोशानादिप्राणाहुत्यन्ते नारायणाद्युपनिषद्भागान्पठेत्। तृप्तिप्रस्श्नान्ते आचान्तेषु प्रागग्रदर्भानास्तीर्य अष्टाक्षरेण अक्षतोदकं दत्वा केशवरूपिणे गुरवेऽयं पिण्डस्वाहा नमः इत्येवं द्वादशपिण्डान् दद्यात्। सर्वत्रपिण्डेषु विष्णुं सम्पूज्य पुरुशसूक्तेन स्तुत्वा विसर्जयेत्। विप्रेभ्यः ताम्बूलदक्षिणा-दि दत्वा नमस्कृत्य शालग्राममूर्तिं आचार्यय दद्यात्। इति नारायणबलिः ॥

॥ अथाराधनविधिः ॥

अथ द्वादशाहे त्रयोदशाहे वा यथाचारमाराधनम्। प्रत्यब्देशु च।

वैष्णवे -

विप्रमाचाम्य विधिवत् दक्षिणाभिः समर्चयेत्।
एकं वृध्दतमं विप्रं हिरण्येन समर्चयेत्॥

तत्र प्रयोगः -

देशकालौस्मृत्वा श्रीनारायणप्रीत्यर्थं गुरोराराधनं करिष्ये इति संकल्प्य षोडषविप्रान् निमन्त्र्य - गुवर्थे त्वया क्षणः कर्तव्यः, परमगुवर्थे ० परमेष्ठि गुर्वर्थे ० परात्पर गुर्वर्थे ० शुक्ल-कृष्ण पक्षभेदेन केशवादि/संकर्षणादि वा द्वादश विप्रान् एवं षोडष विप्राः यतयोवा अशक्तौ यथा शक्ति विप्रान् निमन्त्र्य यथायथं - षोडशक्षणाः देयाः। पादप्रक्षालनादि पूजां विधाय पात्रासनादि - सपरिकरमन्नं परिवेष्य गायत्र्या प्रोक्ष्य गुरवे इदमन्नं परिविष्टं परिवेक्ष्यमाणं च आतृप्तेः स्वाहा हव्यं न मम। एवमेव यथा निमत्रितान् सर्वान् उद्दिष्य अन्नं त्यक्त्वा ब्रह्मार्पणमित्यादि। भुक्तेष्वाचान्तेषु ताम्बूलदक्षिणा वस्त्रादिभिः पूजयेत्। गुरुर्ब्रह्मा गुरुर्विष्णुरिति नमस्कृत्य कर्मेश्वरार्पणं कृत्वा सुहृद्युक्तो भुञ्जीत।

पुत्रकर्तृपक्षे - प्रत्यब्दं पार्वणश्राध्दंकृत्वाऽऽराधनम् ।
शिष्यकर्तृपक्षे - आराधनंपरं नियतम् ॥

शाके चार्णवनेत्रनन्दधरणीयुक्ते समे पार्थिवे
मीमांसानयकोविदो बुधवरः श्रीरामचन्द्रात्मजः ।
राधागर्भजवासुदेवनयवित् सोन्दापुरे जन्मजो
ग्रन्थं तं व्यतनोत् प्रयोगसहितं सन्यासधर्मात्मकम् ॥

॥ इति संन्यासाश्रमग्रहणयतिधर्मयत्याराधनविधिः समाप्तः ॥

लेखकः -

विद्वान् श्रौती मीमांसाचार्यः वे.ब्र.श्री. वासुदेव रा. पराञ्जपे.
गृहसं. ७४५, वैभव ४ मार्ग, २४ उपमार्गः
विद्यारण्यपुरम् , मैसुरु - ५७०००८.
दूरभाषा - ०८२१२४८३१५४.
मोबाईल नं. - ९४४८६०१०५६.



मीमांसाविद्वान् संस्कृतप्रचारधुरंधरः श्रौतप्रवीण इत्याद्युपाधिभिर्विभूषिता महिशूरपुरवासिनः श्रीमन्तो वासुदेव-रामचन्द्र-पराञ्जपे महोदयाः श्रौतकर्मणि आर्त्विज्यार्थम् आसेतुहिमाचलमहिण्डन् ।

मैसूरुविश्वविद्यालयात् एम.ए., बी. एड् इत्युपाधिद्वयमात्मसात् कृतवन्तः इमे अनूचानपद्धत्या ज्ञानपिपासुभ्यः मीमांसादर्शनामृतं पाययन्तो विराजन्ते । नैकेशु शास्त्रसंगोष्ठिषु च प्रवचनपाटवं प्रकटयन्तो ह्येते वेदभष्याणां कर्नाटकभाषानुवादेऽपि कृतभूरिपरिश्रमा विद्योतन्ते ।

गर्भाधानाद्यष्टाचत्वारिंशत् संस्काराणां वैज्ञानिकविमशनैर्विभूषितं संस्कारसंजीविनीत्यन्वर्थाभिधं ग्रन्थं विरचय्य पराञ्जपे महोदयाः विद्वन्मण्डली मणडनायमाना विराजन्ते ।

यांत्रिकेऽपि साम्प्रतिके युगे समयाभावेऽपि क्षणिके काले त्रिकालसन्ध्यावन्दनैः प्रत्येकोऽपि लब्धविप्रजन्मा ब्रम्हतेजांस्यात्मसात्करोत्वितिबुद्ध्या कर्मकाण्डप्रवीणाः एते संक्षिप्तसंध्यावन्दनम् इति ग्रन्थं विरचय्य श्रोत्रियवर्गेषु प्रथिता अभवन् ।

रामचन्द्रिणामेतेषां त्रिंशदधिकवत्सरीयं संस्कृताभाषाध्यापनानुभूतेः फलमित्युक्ते सरलसंस्कृतव्यकरणम् इत्यारख्यस्तेषां ग्रन्थः। ग्रन्थोऽयं प्राचीनप्रणाड्याऽऽधुनिकपद्धत्या च संस्कृतभाषाभ्यासिनां कृते महदुपकारको भूत्वा सर्वजनप्रशंसार्हो विराजते ।

साम्प्रतं च साग्निकस्य निरग्निकस्याग्निहोत्रिणश्च सन्यासग्रहणविधिःविधानं समन्त्रकं कृत्स्नं प्रयोगं प्रवर्ण्य तुरीयाश्रमविषयेऽपि ग्रन्थमारचयन्निमे विद्वांसः । अयमपि ग्रन्थः सनातनधर्मानुरागिभिः सादरं सस्नेहं च प्रशस्येत इत्याशास्महे ।

भारती प्रबोध शोध संस्था

सोंदा, शिरसी, उ. कन्नड

एकोननवत्यधिकैकोनविंशतितमे शतके ख्रिस्ताब्दे (१९८९) एप्रिलमासस्य पञ्चमे दिनाङ्के सोन्दाग्रामवासिनां संस्कृतानुरागिणां श्रीमतां रामचन्द्र-दत्तात्रय-पराञ्जपेमहाभागानां पुण्यस्मृतौ भारती-प्रबोधसंस्कृतग्रंथालयस्य स्थापना स्वकीये सोंदा ग्रामे स्वनिवासे एव कृता। तत्रत्यानां संस्कृतानुरागिणामुपकाराय ग्रन्थालयोऽयं भूयादित्येवासीत्तदानीं मनीषा। ग्रन्थालयेऽस्मिन् वैदिकवाङ्मयादारभ्य अर्वाचीनसंस्कृतसाहित्यपर्यन्तं सहस्राधिकाः ग्रन्था तथा वेदाः, श्रौतं स्मार्तं च कर्म, दर्शनानि, धर्मशास्त्रम्, साहित्यम् इत्यदिविषयकाः शताधिकाः मातृकाग्रन्थाश्च सुरक्षिता वर्तन्ते । यथा यथा ग्रन्थालयस्य वृध्दिरभवत् तथा तथा ग्रन्थालयमेतत् शोधसंस्थारूपेण परिवर्तनीयमिति विचारः सर्वेषां मनस्सु पदं न्यदधत्। तदनुसृत्य मेमासस्य एकविंशतितमे दिनाङ्के पञ्चाधिकद्विसहस्रतमे ख्रिस्ताब्दे ग्रन्थालयोऽयं शोधसंस्थात्वेन परिवर्तितः। वेदाः, श्रौत्रं कर्म तथा स्मार्तं कर्म, दर्शनानि इत्यादिविषयकं संशोधनं करणीयं तच्च विदुषाम्रे प्रकाशनीयमिति धिया संस्थाया अस्याः कार्यं प्रचलदस्ति।

29
P
JAC